॥ इतिश्रीप्रायश्चित्तकदंबनिर्णयः समाप्तः ॥

र्य्यैन्न संशयः अन्यथानिन्द्यपुनरादिप्रायश्चित्तबोधकानि तानि रेतःसेकावरोहणमात्रभेदेन सकृत्सवर्णासवर्णभेदेन व्यवा
स्थेयानीति सुधीभिर्विभाव्यम् इत्यनुपातकप्रायश्चित्तं अथ क्रोधादिना आत्मघातार्थं प्रवृत्तस्य प्रायश्चित्तं तत्र वसिष्ठः क्रोधादिनात्म
घातार्थं व [illegible] तं व्यापारं कृत्वा मृत्युमप्राप्य स्वयं निवृत्तः प्राजापत्यं कुर्य्यात् कतिपयव्यापारं कृत्वा निवृत्तो घृताभ्यक्तो वस्त्राच्छादितः प्राणा
यामत्रयं कुर्वन् गायत्रीं जपन् त्रिरात्रमुपवसेदिति अथात्मघातिनामश्रुपातने प्रायश्चित्तं गोभिर्विप्रैर्हते चैव तथा चैवात्मघातके नैवा
श्रुपातनं कार्य्यं सद्भिः श्रेयोभिकाङ्क्षिभिः एषामन्यतमं विप्रं यो दहेत वहेत वा प्रेतोदकक्रियां कृत्वा तप्तकृच्छ्रं समाचरेत् तच्छव[?] केवलं
स्पृष्ट्वाश्रुपातनं यदि पूर्वोक्तं पुण्यकाशीस्थाने कार्य्यं त्र्यहं क्षपणं स्मृतं अथ चितिभ्रष्टायाः प्रायश्चित्तं आपस्तम्बः चितिभ्रष्टा तु या नारी मोह
विचलिता भवेत् प्राजापत्येन शुध्येत तस्माद्द्वयापेक्षकर्म्मणः एवं च शास्त्रीयमरणसंकल्पनिवृत्तानामपि बोध्यम् बहूनामेकध
र्म्मिणामिति स्ववचनात् अथ रहःकृतेषु संकीर्णापयातासु तारायां गायत्रीजपमधिकृत्य शंखः शतं जप्त्वा तु गायत्रीं सर्वपापप्रणाशिनीं तथा सह
स्रं जप्त्वा तु पातकेभ्यः प्रमोचिनीं दशसहस्रजापेन सर्वकल्मषनाशिनीं लक्षं जप्त्वा तु सा देवी महापातकनाशिनी अथासत्यभाषणप्राय
श्चित्तं तत्र सकृदसत्यभाषणे कृष्णानुस्मरणं यथा विष्णुपुराणे कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते प्रायश्चित्तं तु तस्यैव कृष्णानु
स्मरणं परं कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते भस्मीभवन्ति राजेन्द्र महापातककोटयः इदमेतत्परम[?] विनान्यत्रानुष्ठानलक्षण
प्रा[?]वाप्तिरिति सर्व[?]निर्णयम् ॥ इति श्रीगोपालन्यायपञ्चाननभट्टाचार्य्यविरचितः प्रायश्चित्तकदम्बनिर्णयः समाप्तः ॥ मी· पौषट[?]

प्रा. क.
२९

स्वाभ्रेनं च श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमने स्वसृमरणं सगोत्रायाः समवर्णाया अंत्यजायाः कुमार्य्या रजस्वलायाः
शरणागतायाः प्रव्रजितायाः निक्षिप्तायाश्चेत्यभिधाय प्रायश्चित्तमाह अनुपातकिनस्त्वेते महापा [illegible] यथा अश्वमेधेन शुध्य
न्ति तीर्थानुसरणेन वा अश्वमेधाद्यकरणे द्वादशवार्षिकं व्रतं तद्दशकं अशीत्युत्तरशतप्राजापत्यानि [illegible] अशीत्युत्तरशत
धेनवो देयाः एतज्ज्ञानकृतेनुपातके गम्यागमनव्यतिरिक्ते बोध्यम् अज्ञानतः तदर्द्धं अत्र पितृपत्नी [illegible] स्य हीनवर्णा अन्त्य
जा चाण्[illegible] मार्गा ब्राह्मणकन्यका अगम्यामाह यमः स्नुषा पितृष्वसा माता मर्वी मातृष्वसा सुता मातुलानी स्वसा श्वश्रूं गत्वा स
द्यः पतेद् [illegible] ताश्चान्याश्च सततं नियतं परिवर्जयेत् एतैरगम्यागमनैः सद्यः पतति वै द्विजः अन्याश्चाह नारदः [illegible] नामातृष्व
सा श्वश्रूर्मातुलानी पितृष्वसा पितृव्यानी मित्रपत्नी भगिनी तत्सखी स्नुषा दुहिताचार्यभार्या च सगोत्रा शरणागता [illegible] त्र
जिता धात्री साध्वी वर्णोत्तमा च या अंत्या चांडाली अत्राज्ञानतः संपूर्णं व्रतं द्वादशवार्षिकं ज्ञानतस्तु मरणमिति यत्र
धापाहर [illegible] गत्वा स्कंदति मोहाद्द्वै गुरुतल्पे न युज्यते शिष्यस्योत्कर्तनं कृत्वा प्राणत्यागेन शुध्यति गुरुतल्पव्रतेन द्वाद[illegible]
नेत्यर्थः [illegible] च मातृस्नुषादुहितृव्यतिरिक्तागमने बोध्यं मात्रादिगमनस्यातिपातकत्वेन ज्ञानाज्ञानाभ्यां मरणस्योक्तत्वादिति चांडा
ल्यां [illegible] जस्त्रीणां गर्भोत्पादकस्य च प्रायश्चित्ताभावमाहापस्तंबः अंत्यजायां प्रसूतस्य प्रायश्चित्तं न विद्यते निर्वासनं कृतांकस्य तस्य का।

षेयकर्त्तुर्यत्प्रायश्चित्तं तस्यार्द्धहानिक्रमेण तृतीयसंसर्गिपर्यन्तं प्रायश्चित्तं करणीयं चतुर्थस्य वचनाभावान्न किंचिदिति यथा
चांडालपात्राशने व्यासः येतदन्नाशिनो विप्राः कृच्छ्रात्तेषां विधीयते तद्भोजिनोर्द्धकृच्छ्रेण तदन्नादाश्च पादकः यथापस्तंबः भु
क्तं यैस्तु पक्वान्नं कृच्छ्रं तेषां विधीयते तेषामपि च यैर्भुक्तमर्धं तेषां विधीयते तथा च योयेनेति मनुवचनं संसर्गित्रितयपरमि
ति ज्ञेयं इति संसर्गप्रायश्चित्तं अथानुपातकप्रायश्चित्तनिर्णयः अत्रानुः सादृश्यार्थकः तेन महापातकसदृशमनुपातकमि
ति सिद्धं मनुः अनृतं च समुत्कर्षे राजगामि च पैशुनम् गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं
सुहृद्वधः गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट् निक्षेपस्यापहरणं नराश्वरजतस्य च भूमिवज्रमणीनां च रुक्मस्तेयसमं
स्मृतं रेतःसेकः स्वयोन्यासु कुमारीष्वंत्यजासु च सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं स्मृतं अनृतं च समुत्कर्ष इति शूद्र।
स्य ब्राह्मणोहमिति वचनात्स्वोत्कर्षकथनेन किंचिदिति भाषणं चेति अनृतवचनं गुरोरलीकनिर्बन्धोऽनृषादोषाभियोगः सु
हृद्वधः ब्राह्मणव्यतिरिक्तमित्रवधः गर्हितान्नं शूद्रान्नादि गर्हितायं क्षेत्राकादि निःक्षेपस्यापहरणं ब्राह्मणस्वामिकनिःक्षे।
पीयहरणमिति शूलपाणिः अनृतवचनादेर्ज्ञानतोऽभ्यस्ताभ्यासे महापातकसंज्ञा दशवार्षिकं व्रतम् अज्ञानतः षड्वार्षिकं रेतः।
सेकः स्वयोन्यास्वित्युपलक्षणं यथा विष्णुः पितृपितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारसमं पितृष्वसृमातृष्व

प्रा॰क॰ सुत्तात्समवद्दासवर्णात्समवर्णान्नतुहीनवर्णात्तदभिगमनस्यानुपातकत्वादिति अत्र प्रायश्चित्तं महापापिनः गुरुतल्पगो
२९ लां तप्तामायसीं वा स्वयं विशेत् उत्कृत्य वृषणौ वापि धारयेदं जलौ स्वयं मरणाय ततः मृतगं शरीरस्य वि
मोक्षेण मुच्यते कर्मणोऽशुभात् महाव्रतं चरेद्वापि दद्यात्सर्वस्वमेव वा गुर्वर्थं वा हतो युद्धे मु तल्पगः सुत्तन्मर
णांतिकं ज्ञानकृते मातृव्यतिरिक्तसवर्णोत्तमवर्णगुरुदारगमने वाद्वव्यं महाव्रतं चरेद्वापीति ब्रह्महत्याव्रतं चतुर्विंशतिवार्षिकम्
अज्ञा॰ वार्षिकं द्वादशवार्षिकाभिप्रायमाह शंखः एकमस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः व्रतेनानेन शुध्यतिम
हापातकि स्वर्मे इति गुर्वङ्गनागमनप्रायश्चित्तं अथ संसर्गप्रायश्चित्तं यथा मनुः यो येन पतितेनैषां संसर्गं याति मान तस्ये
वं व्रतं कुर्यात्तत्संसर्गविशुद्धये जाबालः संसर्गी येन संसर्गं कुर्यात्तद्व्रतमाचरेत् तेन नववविधपापान्वितानां मध्ये
प्रमादात्कुर्यात् सतस्य व्रतं कुर्यादिनर्थः व्रतं तु पादोनं यथा व्यासः यो येन संवसेद्वर्षं सोपि तत्समतामियात्
चरेत्तस्य तस्य व्रतं द्विजः यद्यपि मरणे पादोनत्वं न संभवति तथापि मरणानैकल्पिकचतुर्विंशतिवार्षिकं व्रतं पादो॰
व्यमिति संवत्सरसंसर्गे यत्प्रायश्चित्तमुक्तं संवत्सरात्प्राक्तोभोजनाहारः कर्तव्यः यथा बृहस्पतिः षाण्मासिके तु संयोगे याजना २९
ध्यापनादिना एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत् एवमन्निरन्तरमासत्रयसंसर्गे प्रायश्चित्तपाददृष्ट्या चूहनीयं एवं मृत

मौल्यंस्ते सुवर्णस्तु षोडशोतिसनूक्ताशीतिर्गुंजिकापरिमितं हेम तदपहारश्चैव महापातकं न तु तन्न्यूनहेमाहरणे न्यूनसुवर्ण
हरणे षट्त्रिंशन्मितं सुवर्णादल्पहरणे वत्सरः परिकीर्तितः अल्पहरणे सुवर्णद्वादशक्रमेणाकिंचिन्न्यूनसप्तरक्तिकाहरण
इत्यर्थ एवं ज्ञेसे वत्सरे पंचदशधनवर्ण्यगोसुं द्विगुणादिहरणे द्विवार्षिकं व्रतं एतदर्द्धादिहरणे षाण्मासिकं बोध्यं इदमज्ञा
नतः स्वर्णापहरणे व मिश्रुः निः कालकोर्ज्ञातो वा गोमयाग्निना पादप्रभृत्यात्मानं दाहयेत् ततः पूतो भवतीति विज्ञायते अ
न्कोस्तेयकृत् केशश्मश्रुनखलोमरहितः एतच्च ज्ञानतः अज्ञानतस्तु द्वादशवार्षिकमेव यथा शंखः अधःशायी जटाधारी पर्ण
मूलफलाशनः एककालं समश्नानो वर्षे तु द्वादशे गते रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः व्रतेनानेन शुध्यंति महापा
तकिनस्त्विमे अत्र क्षत्रियादीनां परिषद्वैगुण्यादिकं नास्ति अत्राज्ञानतो द्वादशवार्षिकं ज्ञानतो मरणमिव मरणा वे कल्पि
कं चतुर्विंशतिवार्षिकं वा ब्राह्मणस्य द्वादशवार्षिकं अज्ञानतः षड्वार्षिकं इति शूलपाणिः भवदेवस्तु ज्ञानतः सर्वेषाम
रणं चतुर्विंशतिवार्षिकं वाज्ञानतो ब्राह्मणस्य द्वादशवार्षिकं क्षत्रियादीनां पादपादहानि परिषद्वैगुण्यं तु प्रकरणाद्ब्रह्म
वधविषयमित्याह इति सुवर्णस्तेयप्रकरणं अथ गुर्वंगनागमनप्रायश्चित्तं गुरुरत्र पिता यथा मनुः निषेकादीनि कर्मा
णि यः करोति यथाविधि संभावयति चान्नेन स विप्रो गुरुरुच्यते निषेकादीनि गर्भाधानादीनि तस्यांगना मातुः सपत्नी मा चा

संदेयमितिर्वचनात् ज्ञानतस्तयोरपि मरणमवतत्र पादपादहान्यासंभवात् सुरापा॰मनिषेधेयं जात्याश्रय इतिस्था।
मिरिति मनः कुमारवचनं पंचवर्षमध्येपि प्रायश्चित्तबोधकं ततोन्यूनतरस्यास्यनापराधोन पातकमिति अंगिरोवचनम्॥
कुमपानेतरविषयं पूर्वजन्मकृतसुवर्णापहरणसुरापानयोर्नरकभोजनात् क्षीणयोरपि सुवर्णचौरः कौनख्यं सुरापः श्या
वदंतक इति चिह्नादनुमितयोः किंचिदवशिष्टयोरल्पप्रायश्चित्तमाह वसिष्ठः कुनखी श्यावदंतश्च ... चरेयातामिति।
ष्णुः कुष्ठ... कौ ब्रह्महा यक्ष्मी सुरापः श्यावदंतकः सुवर्णापहारी कुनखी दुश्चर्मा गुरुतल्पगः इति कुष्ठी व्रणवान्
सवगात्रेषु ... नासिके इति भविष्यपुराणोक्तः श्यावदंतः स्वभावतः कृष्णदंतः कुनखः संकुचितनख ... द्वयं संक्षे।
पः अज्ञानतो ब्राह्मणस्य सुरापाने द्वादशवार्षिकं क्षत्रियस्य नववार्षिकं वैश्यस्य षड्वार्षिकं ज्ञानतः सर्वेषां ...
द्विश... र्षिकं वा बालवृद्धस्त्रीणामर्द्धं म... वशद्वापतद्बोधकवचनाभावात्प्रायश्चित्ताभावः ... पा॰।
सुवर्ण... रप्रायश्चित्तं तत्र सुवर्णहरणं महापातकं यथाह ... तः ब्रह्महत्या सुरापानं ब्राह्मण ... त्तिपं गुरुदा...
नं संयोगो ... भिः सहेति महापातकं तथा विष्णुः ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णापहरणं ... भ्रगमनं संसर्गश्चा
भिर्तैः सहेति पंचमहापातकानि अत्र ब्राह्मणेति विशेषणात् क्षत्रियादिसुवर्णहरणं नृपपात ... स्तु पंचकृष्णलकां॥

अथ सुरापानप्रायश्चित्तं तत्र सुरामद्ययोर्भेदमाह पुलस्त्यः पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं माध्वीकं कोलटांकं
च मैरेयं नारिकेलजं समानानि विजानीयान्मद्यान्येकादशैव तु द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम् एकादशवि
धमद्यपाने क्षत्रियाणां तत्र दोषाभावमाह याज्ञवल्क्यः कामादपि हि राजन्यो वैश्यो वापि कथंचन मद्यमेवासुरां पीत्वा
न दोषं प्रतिपद्यते अन्नविकारविशेषामाह हेतुः सुरा सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च
न सुरां पिबेत् इति मनूक्तात् चनेन क्षत्रियवैश्ययोः पैष्टीपानेन पातित्यमिति यथाहारीतः गौडी पैष्टी च माध्वी च विज्ञे
या त्रिविधा सुरा यथा चैका तथा सर्वा न पातव्या द्विजोत्तमैः द्विजानां मध्य उत्तमा द्विजोत्तमा ब्राह्मणा इति यावत् समासस्तु
छान्दसः तेन वृद्धयाज्ञवल्क्येन सहन विरोधः क्षत्रियवैश्ययोः सकृदज्ञानतः सुरापाने प्राणान्तिकं ब्राह्मणस्य तु माध्वी
गौडी पैष्टीनामन्यतमपाने प्राणान्तिकमाह याज्ञवल्क्यः सुरांबु घृतं गोमूत्रपयसामग्निसन्निभं सुराम्बुनान्यतमं पीत्वा मरणा
च्छुद्धिमिच्छति बृहस्पतिः सुरापाने ज्ञानकृते ज्वलन्तीं तां विनिःक्षिपेत् मुखे तया विनिर्दग्धे मृतः शुद्धिमवाप्नुयात् अज्ञानतः
सकृत कृते माध्वी गौडी पैष्टीनां यातेब्राह्मणस्य द्वादशवार्षिकं यथा ब्रह्महत्याऽनुक्तोऽयमः चरेत्तामनन्देवो भोसुरापगुरुत
ल्पगोमगोत्रादूषकश्चैव सुवर्णस्तेयकृन्नरः यतद्व्रतं शवापिदं अत्र क्षत्रियवैश्ययोः प्रा[illegible]दशानिः पूर्वोक्तविशेषसक

प्रा॰क॰ क्षत्रियाणां तु ब्रह्मवधे प्रायश्चित्तद्वैगुण्यम् यथाङ्गिराः द्वैगुण्यं क्षत्रियाणां तु वैश्यानां त्रिगुणं स्मृता चतुर्गुणा तु शूद्राणा ... पा
९६ रिषद् उक्ता महात्मनाम् परिषदुक्तव्रतं कुर्य्यात् शुद्धये पापकर्म्मणां अनेकब्राह्मणवधे तत्तत्वादेक्येनैव प्रायश्चि... तं तत्रत्वच
समानदेशकालकर्तृत्वेनागृह्यमाणविशेषात् अधिकाङ्गेनन्यूनाङ्गमिद्धिः प्रसंगादिति न्यायात् ... तनप्रस।
ज्ञात क्षत्रियादिवधप्रायश्चित्तसिद्धिरिति सर्वं यद्यप्यस्मादकामकृतेनत्व द्वैगुण्यं बुद्धिपूर्वकमि... वचनात् मरणवै
कल्पिकत्वात् द्वादशवार्षिकद्वैगुण्यादपि पापक्षयो भवति तथापि कामतो ऽव्यवहार्य्यत्ववचनादिह जायत इति याज्ञवल्क्यो
यादव्यवहार्य्यत्वं अनुपनीतब्राह्मणवधेपि महापातकमर्भहंता यथा ... मिति याज्ञवल्क्यवचनात् हर्णगर्भवधे तद्वर्णवा
चप्रायश्चित्तं स्यात् कृत्वा सुतरां ततोधिकवध्यमनुत्वंब्रह्मवधप्रायश्चित्तमिति शूलपाणिः अत्र सर्वव्रतवक्षि ... गाश
वः पू... विशुद्धस्य धर्मार्थैरुपपाद्य तद्धाग्वस्त्रपवित्राणि भाजनानि विशेषतः ... चैव ... व्रतु
तत्र ... प्रभेदेन दक्षिणाव्यवस्थाप्यं संक्षेपः कामतो ब्राह्मणवधे ब्राह्मणस्य ... च ... वार्षिक...
... द: ... कं तद्दशाको अशीत्युत्तरशतपयस्विनी धेनुदानेन दशाकोचवत्व विंशत्पु... कर्णी पंचशतल...
...णपादिक ... दक्षिणा तु गोशतं ... संवावान्स्त्री वृद्धानामर्द्धमरणेनुतन्नास्ति तत्र ... वस्थाया अभावात्

अथ सुरापानप्रायश्चित्तं तत्र सुरामद्ययोर्भेदमाह पुलस्त्यः पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं माध्वीकं कोलटांकं
७ च मैरेयं नारिकेलजं समानानि विजानीयान्मद्यान्येकादशैव तु द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम् एकादशवि
धमद्यपानि क्षत्रियाणां तत्र दोषाभावमाह याज्ञवल्क्यः कामादपि हि राजन्यो वैश्यो वापि कथंचन मद्यमेवासुरां पीत्वा
न दोषं प्रतिपद्यते अन्नविकारविशेषामरहेतुः सुरा सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च
न सुरां पिबेत् इति मनूक्तावचनेन क्षत्रियवैश्ययोः पैष्टीपानेन पातित्यमिति यथाहारीतः गौडी पैष्टी च माध्वी च विज्ञे
या त्रिविधा सुराः यथा चैका तथा सर्वा न पातव्या द्विजोत्तमैः द्विजानां मध्य उत्तमा द्विजोत्तमा ब्राह्मणा इति यावत् समासस्तु
च्छांदसः तेन वृद्धयाज्ञवल्क्येन सह न विरोधः क्षत्रियवैश्ययोः सकृदज्ञानतः सुरापाने प्राणान्तिकं ब्राह्मणस्य तु माध्वी
गौडीपैष्टीनामन्यतमपाने प्राणान्तिकमाह याज्ञवल्क्यः सुरांबु घृत गोमूत्र पयसामग्निसन्निभं सुरापोऽन्यतमं पीत्वा मरणा
च्छुद्धिमिच्छति बृहस्पतिः सुरापाने ज्ञानकृते ज्वलन्तीं तां विनिःक्षिपेत् मुखे तया विनिर्दग्धो मृतः शुद्धिमवाप्नुयात् अज्ञानतः
मतिकृतं कृते माध्वी गौडीपैष्टीनां पाने ब्राह्मणस्य द्वादशवार्षिकं यथा ब्रह्महत्यानुवृत्तौ यमः चरेतमेतदेवो भो सुरापगुरुतल
ल्पगो मर्गोघ्नादृषकश्चैव सुवर्णस्तेयकृन्नरः गत्वा द्वादशवार्षिकं अत्र क्षत्रियवैश्ययोः पादपादहानिः पूर्वोक्तविधेर्नुमक

प्रा.क. क्षत्रियाणां तु ब्रह्मवधे प्रायश्चित्तं द्वैगुण्यम् यथाङ्गिरा द्विगुणाः क्षत्रियाणां तु वैश्यानां त्रिगुणाः स्मृताः चतुर्गुणा तु शूद्राणां।प॥

२६ रिषदुक्ता महात्मनाम् परिषदुक्तव्रतं कुर्य्यात् शुद्धये पापकर्म्मणां अनेकब्राह्मणवधे तत्तत्वादेकमेव प्रायश्चि[illegible] तं तत्रत्वच

समानदेशकालकर्तृत्वं विना गृह्यमाणविशेषात् अधिकाङ्गं न न्यूनाङ्गमिति प्रसङ्ग इति न्यायात् ब्रह्म[illegible]चेतनप्रम

ज्ञात क्षत्रियादिवधप्रायश्चित्तसिद्धिरिति सर्वं यद्यपि स्यादकामकृतेन त्व[illegible] गुण्यं बुद्धिपूर्वकमि[illegible]वचनात् मरणवे

कल्पिकत्वाद्द्वादशवार्षिकद्वैगुण्यादपि पापक्षयो भवति तथाऽपि कामतोऽव्यवहार्य्यमनुवचनादिह जायत इति याज्ञवल्की

याद्व्यवहार्य्यत्वं अनुपनीतब्राह्मणवधेऽपि महापातकमर्भहन्ता यथा[illegible]गामि[illegible]ति याज्ञवल्क्येन तत्तद्दर्णगर्भवधे तद्दर्णवा

धप्रायश्चित्तसम्पादकत्वात् मनुना गन्तेनोऽधिकवयस्समस्तुल्यं ब्रह्मवधप्रायश्चित्तमिति शूलपाणिः अत्र सर्वत्र नवक्षि[illegible]गाश

षः पू[illegible]विशेषस्य धर्मार्थैकपपाद्यत्वात् ह्योरेवस्त्रपवित्राणि भाजनानि विशेषतः [illegible]चैव[illegible]चतु

तत्र[illegible]भेदेन दक्षिणाव्यवस्थाप्यते संक्षेपः कामतो ब्राह्मणवधे ब्राह्मणस्य[illegible]च[illegible]वार्षिके

द्वादः[illegible]कं तदशक्तौ अशीत्युत्तरशतपयस्विनीधेनुदानेन दशशक्तौ च चत्वारिंशत् पु[illegible]कार्षापंचशतल

[illegible]णपादिका दे[illegible]दक्षिणानुगोश[illegible] संवादात् स्त्रीह्रेठानामस्ई मरणे न तन्नास्ति तत्र[illegible]वस्थाया अभावात्

तरकार्षापणसहस्रंस्यात् गोसहस्रमूल्यंमार्द्धद्वयाधिकाष्टसप्ततरकार्षापणसहस्रंस्यात् अतःषष्टिधेनुशतत्रयमूल्य
मार्द्धसप्तदशकार्षापणाधिकंस्यादितिशूलपाणिः नचानुष्ठेयं सम्यमाकलय्यद्वादशवार्षिकमहाव्रतेधेनुमूल्यंकिंचिन्न्यूनका
र्षापणत्रयंगोमूल्यंसप्तदशपणाइतिलिखितंतदत्रनिष्कायकंसुधीभिर्विभाव्यम् अथब्रह्मवधप्रायश्चित्तंतत्रज्ञानतोब्रह्म
वधेसर्ववर्णानांमरणमेवप्रायश्चित्तम् यथामनुः लक्ष्यंशस्त्रभृतांवास्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौवासमिद्धेत्रि
रवाक्शिराः लक्ष्यमित्यनेनमृतःशुध्यतिजीवन्नपिशुध्यतीतिसूचितंसंग्रामेवाहतोलक्ष्मीभूतः शुद्धिमवाप्नुयात् मृतकल्पःप्र
हारार्त्तोजीवन्नपिविशुध्यति इतियाज्ञवल्क्योक्तात् विदुषांपातकशोधनार्थमयंलक्ष्मीभूतइतिविजानताम् अज्ञानकृतेतुभैक्ष्य
मात्मशुध्यर्थंकृत्वाशवशिरोध्वजमितिमनुवचनात् शवशिरःचिन्हसहितंद्वादशवार्षिकंव्रतंकार्य्यम् अश्वमेधगोसवाभि
जिद्विश्वजिदग्निष्टोमादियागकरणंतथाऋग्यजुःसामाथर्वणाख्यैकतरपठनम् तथाब्रह्मचर्यपूर्वकमनुबंधदर्शनम् तथा
वेदविदेसर्वस्वदानम् तथाजीवनकालव्यापकधनदानंप्रायश्चित्तम् १० यथामनुः यजेतवाश्वमेधेनस्वर्जितागोसवेनवा।
अभिजिद्विश्वजिद्भ्यांवात्रिवृताग्निष्टुता पिवाजपन्वान्यतमंवेदंयोजनानांशतंव्रजेत् ब्रह्महत्यापनोदायमितभुक्संय।
तेन्द्रियः सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत् धनंवाजीवनायालंगृहंवासपरिच्छदंहविष्यभुग्वानुसरेत्प्रतिस्रोतः सरस्वतीं

प्रा॰ क॰ स्वद्रव्यसामान्यकर्तृगुणदोषाद्यपेक्षया उत्कर्षापकर्षौ द्रव्यापहरणे वैषम्यदोषः समर्थनीय इति शूलपाणिः अथातिपा[illegible]
२५ यश्चित्तं तत्रातिपातकानां ज्ञानतोऽज्ञानतश्चाग्निप्रवेशमेव प्रायश्चित्तं यथाह विष्णुः मातृगमनं दुहितृगमनं [illegible]मनमि
अतिपातका[illegible] तकिनस्त्वेते प्रविशेयुर्हुताशनम् न ह्यन्यानि कृतिस्तेषां विद्यते हि कथंचनेति ज्ञान[illegible]ज्ञानतश्चेत्यर्थः
अथ महापातक[illegible]मान्य प्रायश्चित्तानि अत्र शंखः त्रिषवणस्नायी कृत्वा पर्णकुटीं वने अधःशायी [illegible] पर्णमूलफलाश
नः ग्रामं विशेत्तु भिक्षार्थी स्वकर्म परिकीर्तयन् एककालं तु भुञ्जानो वर्षे च द्वादशे गते रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः
व्रतेनानेन शुध्यन्ति महापातकिनस्त्विमे यथा गिराः षड्भिर्वर्षैः कृच्छ्रचारी ब्रह्महा पूयते नर इति द्वादशवार्षिकमहा[illegible]शीति
शतं प्राजापत्यानि साशीति पयस्विधेनुशतं तन्मूल्यानि चत्वारिंशत्पुराणाधिकपंचशतं कार्षापणा वा च त्वा[illegible]
शीतिधेनुशतदानं कार्यमत्रेति चेत् न यतोऽङ्गिरसा ज्ञानकृते ब्रह्मवधे गते तु द्वादशे वर्षे ब्रह्महा पूयते नर इत्यभि
हे गुणं च चतुर्विंशतिवार्षिके वक्तव्यं गवां महत्त्वं विधिवद्द्विजेभ्यः प्रतिपादयेत् ब्रह्महा विप्रमुच्यते सर्वपापेभ्य एव च
[illegible]त्तदानयोर्मूल्येन तुल्यत्वाभिधानार्थं तेन धेनुमूल्यं सपादकपर्दिकाद्वयाधिककाकिणीत्रयन्यूनपुराणत्रयं तेनैतद्भवति
[illegible] अन्यथा पयस्विधेनुमूल्यं यथाश्रुतं पुराणत्रयं यदि स्यात् सदा वैषम्यं स्यात् यतः सपादषष्टिपयस्विधेनुशतत्रयमूल्यम् अशी
३

त्तं तत्र विष्णुः पर्वानारोग्यवर्जं मृतावगच्छन् पत्नीं त्रिरात्रमुपवसेत् अत्र चतुर्विंशतिपणाः अथ रजस्वलागमनप्रायश्चित्तं।
तत्र याज्ञवल्क्यः त्रिरात्रांते घृतं प्राश्य गत्वोदक्यां शुचिर्भवेत् त्रिरात्राशक्तौ चतुर्विंशतिपणा देयाः एतदकामतः सकृद्गमने अ
भ्यासे तु प्रायश्चित्तावृत्तिः श्राद्धदिने मैथुने दिनमेकमभोक्तव्यमिति यथा यमः वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातक
व्रतलोपे च दिनमेकमभोजनं स्नातको गृहस्थः अथ पितृष्वस्रादिसुतापरिणयनप्रायश्चित्तं यथा सुमंतुः पितृष्वसृसुतां मा
तृसुतां मातृसगोत्रां समानार्षेयां विवाह्य चांद्रायणं चरेत् परित्यज्य चैनां बिभृयादिति मातृसगोत्रां मातामहस्य स[illegible]पुरु[illegible]न्तय।
वदिति शूलपाणिः अथ पतितप्रतिग्रहप्रायश्चित्तं बृहस्पतिः पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्वीत चांद्रा।
यणमथापि वा अत्र ज्ञानाभ्यासे मासोपवासः सकृत् ज्ञाने तु चांद्रायणं सकृदज्ञाने चांद्रायणार्द्धमिति -- मासोपवासे पंचदशाधे
नवः संवत्सरेण मासाशीतिपूर्यंते नात्र संशयः इत्यंगिरोवचनेन द्वादशवार्षिकस्य व्रतस्य संवत्सरमासोपवासेन सह विकल्पितत्वा
न् अथ मणिमुक्तादिस्तेयप्रायश्चित्तं तत्र मनुः मणिमुक्ताप्रवालस्य सर्वस्याश्ममयस्य च अयस्कांस्योपलानां च द्वादशाहं कणान्न
ता कणान्नता कणभक्षणं अत्र षडुपवासाः जाबालः रजताश्वगोभूकन्यानां सकृद्धरणे चांद्रायणं एतच्चापहृतद्रव्यदानपूर्वकं
कर्तव्यं यथा विष्णुः दत्त्वैवापहृतं द्रव्यं धनिकस्याभ्युपायतः प्रायश्चित्तं ततः कुर्यात्कल्मषस्यापनुत्तये अत्र सकृदभ्यासकालदे

प्रा·क· ।पानप्रायश्चित्तं सकृदज्ञानात्पाने तउपवसेदित्यनुक्तौ अनिर्दशायागोः क्षीरमौष्ट्रमेकशफं तथा आविकंसंधिनीक्षी वत्सा।
२४ याश्चगोःपयः आरण्यानांचसर्वासांमृगाणांमहिषीविना क्षीराण्येतान्यपेयानिद्विजातीनांसदैवहि शंखः म द्विजातीनांक्षी
रमपेयमजा गोगमनप्रायश्चित्तं तत्रविष्णुः गोव्रतंगोगमनेचगोव्रतंशूद्रस्वामिगोवध्यो धेनुचतुष्टयं इ
दंसकृदज्ञाने शंखः मोक्षपरिकीर्णसंवत्सरंप्राजापत्यंचरेत्तत्रत्रिंशद्धेनवः अस्य तात्पर्ये गौतमः गविचगुरुतल्प
समंगुरुतल्पसममिति द्वादशवार्षिकं अशीत्युत्तरशत धेनवोवा निरंतरंसंवत्सराभ्यासेमरणांतिकमिति शूलपाणिः वसु
तोदिनाभ्यासएवमरणमितिद्रष्टव्यं अथपरिवेदनादिप्रायश्चित्तंतत्रहारीतः ज्येष्ठेनिर्विण्णे कनीयान्परिवेत्ताभ तिपरिवि
त्तिर्ज्येष्ठः परिवेदनीयाकन्यापरिदायीदातापरिकर्तायाजकस्तेसर्वेपतिताः संवत्सरंप्राजापत्येनकृच्छ्रेण त्रिं
शद्धेनवः इदंतुज्येष्ठमुद्दिश्यकन्यात्यागानंतरमिति अथव्रात्यप्राय श्चित्तंतत्रविष्णुः येषांद्विजानांसावि
विधितोश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनाययेत् तत्रधेनुत्रयंएतत्पितृमातृरहितस्यनिःस्वजनस्यस।
आलस्यादनवधानाः सावित्रीपाते शंखलिखितौ व्रात्यस्तोमंचांद्रायणंकुर्यात गोप्रदानंचेतिव्रात्यत्वंचपंचदशवर्षात्प न २०
यमः पतितायस्यसावित्रीदशवर्षाणिपंचचप्रायश्चित्तंभवेत्तेषांप्रोवाचवदतांवरः अथऋतौभार्यानधिगमनप्राय

मतं ——— ज्ञानतः सकृद्भोजने द्विगुणमिति अथ बिडालाद्युच्छिष्टभक्षणे प्रायश्चित्तं तत्र मनुः बिडालकाकाद्युच्छिष्टं जग्ध्वा ऽ
श्वनकुलस्य च केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां ब्रह्मसुवर्चलापीतसूर्यावर्तैः तां च पीत्वा दिनमेकमतिवाहनीयं द
दमज्ञानतः ज्ञानात्तु त्रिरात्रं यथा शंखः दूषितं केशकीटैश्च मार्जारैर्मूषकैस्तथा मक्षिकादंशकैश्चैव त्रिरात्रं तु व्रतं चरेत् [illegible]कं
मन्त्रसमूलं व्रतं गोमूत्रयावकेन तद्दशकोसार्द्धपणा देयाः सकृद्भोजनविषयमेतत् अथ विण्मूत्रादिदूषितकूपादिजलपाने प्रा
यश्चित्तं कूपे विण्मूत्रसंपृक्ते पीत्वा तोयं द्विजोत्तमः त्रिरात्रेण विशुध्येत्तु कुंभे सांतपनं स्मृतं इदमज्ञानतः ज्ञानात्तु द्विगुणमिति
सांतपनमाह यत्र स्वपुराणे प्रथमेऽह्नि नाश्नीयाद्गोमूत्राशी ततः परं तृतीये गोमयाशी स्याच्चतुर्थे क्षीरपो भवेत् पंचमे दधिभुक् चैव
घृतं षष्ठे पिबेत्ततः कुशोदकं सप्तमे तु कृच्छ्रं सांतपनो विधिः अत्र धेनुद्वयमिति शूलपाणिः अथ भक्ष्यपंचनखशवदूषितजलपाने
आपस्तंबः अंतस्थितेषु क्लिन्नेषु सर्वपंचनखेषु च पिबेदपेयकूपेषु षड्रात्रेण विशुध्यति अक्लिन्नेषु त्रिरात्रं स्याच्छूद्राणां दिनमेव
चगतच मनुष्यशवविषयम् यथा देवलः क्लिन्ने भिन्ने शवे चैव न तत्रस्थं यदपः पिबेत् पराकेण विशुद्धिः स्याद्ब्राह्मणानां च
भोजनात् अत्यंताभ्यामलघुहारीतः क्लिन्ने भिन्ने शवे चैव तत्रस्थं यदि तत्पिबेत् शुध्येच्चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा क्लि
न्नो भिन्नः शवश्चैव तत्रस्थो यदि दृश्यते पयः पिबेत्त्रिरात्रं तु मानुषे द्विगुणं स्मृतम् एतदज्ञानतः [illegible] ज्ञानतो द्विगुणं अथापेयपी

पनंमेखलांदंडौभैक्ष्यचर्याव्रतानिचनिवर्त्तंतेद्विजातीनांपुनःसंस्कारकर्मणि अत्रस्वाध्यायोद्ध्पेक्षापिनास्तीति [illegible] यमःवि
प्रस्यक्षत्रियस्यापि [illegible] ादुत्तरायणेदक्षायणेविशांकार्यानानध्यायेनसंक्रमे अनध्यायेपिकुर्वीतयस्य [illegible] ।त्तकंभवेत्अ
पिनादक्षिणमुखणङ् [illegible] योःसमुच्चयःमलमासादिदोषोप्यत्रनास्तिनैमित्तिकत्वात्नैमित्तिकानिकर्मा [illegible] णिनिपततियदाय
दा नदातदैवकार्याणिनकालंतुविधीयते अथाभोज्यान्नाब्राह्मणास्तत्रबृहस्पतिः नटनर्तकतक्षाणश्चर्मकारःसुवर्णकृतभ
शौंडिकासेंद्रिकाःषंडाःअभोज्यान्नाःप्रकीर्त्तिताःकर्मकराश्चक्रिणश्चमृतकाघोषकास्तथाचक्रोपजीविनश्चैवकैवर्त्ततक्षका
स्तथाअंत्रोपजीविनश्चैवषंढ्राध्यापकयाजकाःचित्रोपजीविशिल्पीचवार्द्धुषिर्ब्रह्मविक्रयीवृथाश्रमीवृथाद [illegible] ष्यमाणां
चभेदकःपुण्योविक्रयकोपश्चयोनिसंकरजातयःवंशोपजीविकुंडाशीपरिवित्तिस्तुवीरहाभिषजोगारदश्चै [illegible]
वचकर्मस्वेतेषुयोमोहाद्ब्राह्मणोवर्ततेसदा प्रायश्चित्तेस्वनाचीर्णेपरिहार्योभवेत्सतांतेषांतुब्राह्मणोभुक्त्वाह्व [illegible]
ग्रहं प्राजापत्येनशुध्येततततः पापान्नसंशयःएतदज्ञानतःअज्ञानतस्त्र्यहं तथाचमनुः भुक्त्वातोन्यतमस्यान्नमम [illegible]
पणंत्र्यहंमत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेतिकारिकावाधार्वीरहानस्याग्निःकलविंकादिभक्षणेत्र्यहोपवासमाह्वि
ष्णुःकलविंकहंससारसदुर्धरचक्रवाकरज्जुवालमागमदात्यूहशुकसारिकाकोकिलखंजनाशनेत्रिरात्रमुपवसेदिति इदमज्ञा

यगोमांसभक्षणप्रायश्चित्तंसुमंतुः गोमांसभक्षणेप्राजापत्यंचरेदितिइदमज्ञानतः सकृद्विषयं ज्ञानतोद्विगुण्यंज्ञानाभ्या
सेपराशरः अगम्यागमनेचैवमद्यगोमांसभक्षणे शुद्ध्यैचांद्रायणंकुर्य्यान्नदींगत्वासमुद्रगां अनडुत्सहितांगांचदद्याद्विप्राय
दक्षिणामिति गामश्वंकुंजरंउष्ट्रंचसर्वंपंचनखंतथा क्रव्यादंकुक्कुटंग्राम्यंकुर्य्यात्संवत्सरव्रतं तथाभुक्तेत्यर्थः एतच्चि ...
कालाभ्यासेपंचनखंशशकादिपंचनखभिन्नंसंवत्सरव्रतेपंचदशधेनवः एतस्यप्रायश्चित्तस्यांतेपुनरुपनयनमाह ...
ग्राम्यकुक्कुटनरगोमांसभक्षणेचसंवत्सरेषुद्विजातीनांप्रायश्चित्तांतेपुनःसंस्कारंकुर्यादिति अथमूत्रपुरीषादिभक्षणेप्राय
श्चित्तंबृहस्पतिः अमेध्यानामपेयानामभक्ष्यस्यचभक्षणेरेतोमूत्रपुरीषाणांशुद्ध्यैचांद्रायणंचरेत् अज्ञानेतुगोजमःमूत्रपुरीषरे
तसांप्राशनेतप्तकृच्छ्रमिति उभयत्रपुनःसंस्कारः यथायाज्ञवल्क्यः अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच पुनःसंस्कारमर्ह
न्तित्रयोवर्णाद्विजातयः यत्तुविण्मूत्रभक्षणेविप्रः प्राजापत्यंसमाचरेत् इत्यापस्तंबवचनम् तद्बलात्कारविषयमितिशू
लपाणिः ...कादशवर्षीयबालविषयमितिस्मार्ताः क्षत्रियादीनांपादपादहानिः याज्ञवल्क्यः पलांडुंविड्वराहंचछत्राकंग्रा
मकुक्कुटंलसुनंगृंजनंचैवभुक्त्वाचांद्रायणंचरेत् एतदज्ञानतः ज्ञानतस्तप्तकृच्छ्रमि तिशूलपाणिः एषुप्रायश्चित्तांतेपुनः
संस्कारंकुर्यादितिविष्णुवचनात्पुनःसंस्कारः संस्काराकरणेचांद्रायणमितिशूलपाणिः उ...नकारणेविशेषयतिमनुःव

प्रा॰ ।मभिगच्छेत्तदाशरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत ब्राह्मण्यां पूर्ववत् वैश्यश्चेद्ब्राह्मणीमभिगच्छेत्तदा लोहि[illegible]

२ त्वाग्नौ प्रास्येत ब्राह्मण्यां पूर्ववत् एवं वैश्यो राजन्यायां शूद्रो राजन्यवैश्ययोर्गमने महापथमिति महापथ्यागमनं [illegible] यन रोज्झ

र्गेण पुनरावर्त्तयेन्निःसारयेदित्यर्थः एतदज्ञानतः अज्ञानतः शूद्रस्य ब्राह्मणीगमने द्वादशवार्षिकं क्षत्रि[illegible]मने पादोनव

कं वैश्यागमने षाड्वार्षिकं यथा प्रचेताः शूद्रस्य ब्राह्मणीं मोहात् गच्छतः शुद्धिमिच्छतः पूर्वमेव कर्त्तं देयं [illegible]ता यस्माद्धितस्य स

द्रहान्याऽन्यवर्णासु गच्छतः सार्ववर्णिकं प्रायश्चित्तमिदं देयमगम्यागमने क्रमात् अत्रायं संक्षेपः अज्ञानतः शूद्रस्य ब्राह्म

णीगमने द्वादशवार्षिकं वैश्यागमने षाड्वार्षिकं अज्ञानत इति सर्वत्रान्वयः कर्त्तव्यं वैश्यस्य ब्राह्मणीगमने प्राय[illegible]ं नववा

र्षिकं क्षत्रियागमने षाड्वार्षिकं क्षत्रियस्य ब्राह्मणीगमने षाड्वार्षिकमिति यत्तु शंखवचनं प्रातिलोम्ये वधः एं[illegible]नमा।

दिकर्त्तनं तद्यथोक्तमरणांतिकप्रायश्चित्ताचरणे प्रसक्तिनिवारणार्थं पुरुषस्य वधं स्त्रीणां नासादिकर्त्त[illegible]

धातिनतु प्रायश्चित्तं यमः क्रोधान्मोहाद्दर्भ्भार्यां मातरं भगिनीमपि प्राजापत्यव्रतं कुर्यात्सर्ववर्णेष्वयं विधिः स्यात्।

हेमत्स्य सह कं क्रोधाद्यदि प्रजेद्भार्यां वयस्यां च गुणान्वितां ऋषिचांद्रायणं कृत्वा पुनः संग्रहमादिशेत् ऋषिचांद्रायणमाह[illegible]

त्रींस्त्रीन् पिं[illegible]न समश्नीयान्नियतात्मा दृढव्रतः हविष्यान्नस्य वै मासं ऋषिचांद्रायणं स्मृतं ऋषिचांद्रायणे धेनुचतुष्टयं अ

दीनं कार्य्यमितिवचनार्थः तेन ब्राह्मणस्य क्षत्रियागमने द्विवार्षिकं पाददीनं सार्द्धवार्षिकं व्रतं वैश्यागमने वार्षिकं पादद्वयही
नं षाण्मासिकव्रतं विशिष्टशूद्रागमने एवं अधमशूद्रागमने षाण्मासिकम्पादत्रयहीनं सार्द्धमासिकव्रतमितिवर्षाणां त्वनु
वृत्तौ पुरुषान्तरव्यभिचरितसवर्णादुःत्वित्यनुवृत्तौ च यमः द्विपरभार्य्यासु स्त्रीणि श्रोत्रियपत्नीषु गत्वा कामतः सकृद्गमने ऽभ्या
से त्वापस्तम्बः सवर्णायामनन्यपूर्वायां सकृत्सन्निपाते पादः पततीत्युपदिशन्ति अभ्यासे द्विपादः अत्यन्ताभ्यासे त्रिपादश्चतुर्यम
र्वमिति द्वादशवार्षिकमित्यर्थः अर्द्धमज्ञानतः अत्यन्तनिर्गुणब्राह्मणपत्न्यभिगमने ब्राह्मणस्य वार्षिकं प्रायश्चित्तमाह बौधाय
नः पुंसां ब्राह्मणादीनां संवत्सरं ब्रह्मचर्य्यं शूद्रं कटाग्निना दहेदिति स्वभर्तृव्यतिरिक्तसवर्णैकपुरुषगामिन्यामभिगन्तुः सवर्ण
स्य पूर्वोक्तप्रायश्चित्तहानिः एवं पुरुषद्वयगामिन्यां द्विपादहानिः एवं पुरुषत्रयगामिन्यां त्रिपादहानिः तेन पुरुषचतुष्टयगा
मिन्यां स्वैरिण्यां ब्राह्मण्यां शंखेनान्यत्प्रायश्चित्तमुक्तं न द्विवार्षिकव्रतमिति यथा शंखः ब्राह्मण्यां स्वैरिण्यामवकीर्य्य त्र्यहमुपो
ष्य घृतमात्रं दद्यात् अत्रैकपुरुषव्यभिचरितसवर्णस्त्र्यादिगमने पादपादह्रास इत्यर्थकं पूर्वोक्तापस्तम्बवचनमिति भवदेवः
अथ चण्डालादीनां प्रतिलोमस्त्रीगमनप्रायश्चित्तं तत्र वसिष्ठः शूद्रश्चेद्ब्राह्मणीङ्गच्छेत्तदा वीरणादलैर्वेष्टयित्वा शूद्रमग्नौ प्रास्ये
त् ब्राह्मण्याः शिरसि वपनं कृत्वा सर्पिषाभ्यक्तां नग्नां खरमारोप्य महापथं नयेत् तत्पूता भवतीति विज्ञायते राजन्यश्चेद्ब्राह्म

॥

नामंस्पृष्टएवचअनुच्छिष्टशूद्रस्पर्शे उच्छिष्टब्राह्मणस्यनक्तमितिप्रायश्चित्तविवेकः कूर्मपुराणे उच्छिष्टेनतुविप्रेणवि
ःस्पृष्टस्तु तादृशः उभौस्नानंप्रकुर्वतः सघएवंविशुध्यतः इतिशूद्रोच्छिष्टभक्षणादि प्रायश्चित्ते अथशूद्रोदकक्र
गनादिप्रायश्चित्तं स्नानमाचमनंदानंदेवतापितृतर्पणं शूद्रोदकेर्नकुर्वीततथामेघाच्छिनिःसृतैः एतत्करणेवेदोदिता
नानेत्यानांकर्मणाम तिक्रमेस्नातकव्रतलोपेचदिनमेकमभोजनंअत्रदिनमेकमभोजनमितिमनुवचनादेकोपवासः
अथयज्ञोपवीतरहितकृतभोजनप्रायश्चित्तंविनायज्ञोपवीतेनभुंक्तेचब्राह्मणोयदिस्नानंकृत्वाजपंकृत्वापंचगव्येनशुध्य
ति अथोपवीतच्छेदप्रायश्चित्तंस्मृतिसागरे आपस्तंबः ब्राह्मणेनयदादैवाच्छिन्नंयज्ञोपवीतकंमनस्तापेनशुद्धिःस्यादा
पस्तंबोब्रवीन्मुनिः प्राणायामत्रयंकृत्वानिराहारःक्षिपेद्दिनंबृहन्मनुः उपवीतंब्राह्मणस्यच्छिन्नंशूद्रेणकामतः अन्यद्द्वादा
यमंत्रेणजपन्नुपवसेद्दिनंमंत्रानादेशेगायत्रीतिवचनादिनिर्दिष्टेशतमितिवचनात्तथाचशताहृत्तागायत्रींजप्त्वोपवसे
दित्यर्थः बृहस्पतिः शूद्रेणतुयदाच्छिन्नमुपवीतंद्विजन्मनः दंडंत्रिंशत्पणंदत्वाप्राजापत्येनशुध्यति अथानुलोमेनब्राह्म एम
णादीनांपरस्त्रीगमनप्रायश्चित्तंशंखः ब्राह्मणेनगुणहीनशूद्रागमनेसार्द्धमासिकव्रतंकरणीयंयथाहप्रचेताः आ २१
नुलोम्येनविहितंत्र [illegible] त्रावगोपितमितिकृच्छ्रंमहाव्रतंतत्रसजातीयगमनेयदुक्तंतदुक्तमेवाधमायांगमनेपादपाद

पत्यंसमाचरेत् अर्द्धोच्छिष्टेस्पृष्टः पादः पादः आमाशनेतथाप्राजापत्यंज्ञाने ऽज्ञानतोर्द्धं अर्द्धोच्छिष्टेयेनाद्यग्रासः आस्यनिः
क्षिप्तोननिर्गीर्णः पानादौशवादिस्पर्शेप्रायश्चित्तमाहदक्षः पानेमैथुनसंसर्गेतथामूत्रपुरीषयोः संस्पर्शेयदिगच्छेत्तुशवा
दक्वांत्यजैः सहदिनमेकंचरेन्मूत्रेपुरीषेचदिनद्वयंदिनत्रयंमैथुनेतुपानेदद्याच्चतुष्टयं अत्रायंसंक्षेपः शौण्डिककापालि
कांत्यजादीनांमक्तदज्ञानतोन्नभोजनेधेनुद्वयंपक्वान्नभोजनेधेनुरेका आमान्नभोजनेधेनुमूल्यार्द्धं उच्छिष्टान्नभोजनेप्राग्दान
धेर्मुच्चतुष्टयंस्पृष्टान्नभोजनेसर्वत्रपादः पीतावशेषजलपानेकार्षापणद्वयमितिभाण्डस्थजलपानेतुकार्षापणैकः खानित
जलपानेचकार्षापणार्द्धं अभिगमनेचांद्रायणं अज्ञानतः सकृद्भुक्तोच्छिष्टस्पर्शेधेनुमूल्यार्द्धं अर्द्धोच्छिष्टस्यांत्यजस्यस्पर्शे
आमान्नाशनेचतत्यार्द्धः मूत्रोच्छिष्टेकार्षापणार्द्धं पुरीषोच्छिष्टेचकार्षापणैकं मैथुनोच्छिष्टेचकार्षापणं पानोच्छिष्टेचकार्षा
पणद्वयमितिज्ञानतः सर्वत्रद्विगुणं अभ्यासादावावृत्यादिकंसर्वत्रकरणीयं सर्वत्रक्षत्रियादीनांपादपादहानिः सर्वत्रस्त्री
बालवृद्धानामर्द्धं इतिशौण्डिकांत्यजान्नभक्षणादिप्रायश्चित्तनिर्णयः संपूर्णः अज्ञानात्सकृच्छूद्रोच्छिष्टभोजनेत्रिरात्रा।
भोजनंयथापस्तंबः अज्ञानाद्यस्तुभुंजीतशूद्रोच्छिष्टंद्विजोत्तमः त्रिरात्रोपोषितोभूत्वापंचगव्येनशुध्यति ज्ञानेतुद्विगुणमि
तित्रिरात्रोपवासेमार्द्धकार्षापणत्रयकांचनंब्रह्मपुराणे उच्छिष्टेनतुशूद्रेणविप्रःस्पृष्टस्तुतोदशः उपोष्यामेनशुद्धःस्याच्छू।

प्रा — नशुध्यति सकृत्पानविषयमेतत् ज्ञाने तु द्वैगुण्यं अभ्यासे तु प्रायश्चित्तावृत्तिः षामज्ञानतो भाण्डस्थोदकपाने पराशरः

२ स्थितमभोज्यानामापो दधिपयः पिबेत ब्राह्मणाः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ब्रह्मकूर्चोपवासेन द्विजातीनां तु नि

शूद्रस्य तूपवासेन दद्याद्दानं च शक्तितः चतुर्दश्यामभोजनं परदिने पंचगव्यमात्रभोजनं ब्रह्मकूर्चं द्वयोर्हेमाध्यंतदशमा

णलभ्यं कांचनदानम् अंत्यजखानितकूपादिषु सकृत्स्नानाद्याचरणे तु अंत्यजैः खनिताः कूपास्तडागानि तथैव च

स्नात्वा च पीत्वा च पंचगव्येन शुध्यति पंचगव्यपानमुपवासपूर्वकं व्रतरूपत्वात् इदमज्ञानतः ज्ञाने तु द्वैगुण्यमिति अं

ादिस्त्रीसंकरगमने ज्ञानतश्चांद्रायणं ज्ञानतस्तु द्वैगुण्यं तदाह संवर्तः नटीशैलूषिकीचैव रजकीवेणुजीविका गत्वा चां

कुर्यात्तथा चर्मोपजीविनीं कामतस्तु यदा गच्छेच्चरेच्चांद्रायणद्वयम् नद्याद्युपलक्षणं शौंडिकादिस्त्रीणामपि परिग्र

र्शितं बहूनामिति वचनात् अज्ञानाच्चतुर्विंशतिवाराभिगमने पातित्यं ज्ञानाद्द्वादशवाराभिगमने इति यत्तु कापाभ

ल्लिकान्नभोक्तृणां नारीगामिनां तथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयमित्यापस्तंबवचनं तदभिगमने ज्ञानाज्ञाना राम

भ्यामभ्यासविषयं अष्टधा भोजनविषयं त्वकृच्छ्राब्दे त्रिंशद्दिनवः चांद्रायणद्वये पंचदशधेनवः भुक्तोच्छिष्टेनांत्यजस्पर्शने २०

प्राजापत्यं प्रायश्चित्तं करणीयं अहोच्छिष्टमान्नाशनयोः प्राजापत्यपादः करणीयः आपस्तंबः भुक्तोच्छिष्टोंत्यजैः स्पृष्टः प्राजाप

व्रतीभवेत व्रतीयावकेनतदशक्तौधेनुद्वयम् आमान्नभक्षणेतुसार्द्धकार्षापणोकल्प्यंकांचनम् यथायमः श्वपचांशौंडिका
नांचचैलनिर्णेजकस्यचरजकस्यनृशंसस्य उग्रस्यचोपपतिर्गृहे भुक्त्वाचान्नतमस्यान्नममत्याक्षपणं त्र्यहं एवंचपादआ
माशनेतथेत्यापस्तंबीयेनसहैकवाक्यसंगच्छेत इतिरजकोवस्त्ररंजनकर्त्तानृशंसोघातकः अत्रमनुनाशौंडिकाद्यंत्य
जातीनांतुल्यप्रायश्चित्तविधानात् आमान्नेसर्वेषांतुल्यंप्रायश्चित्तंवहूनामेकधर्माणामेकस्यापियदुच्यतेसर्वेषामेवतत
त्कुर्यादेकरूपाहितेस्मृतातथाचशौंडिकपदंकापालिकांत्यजोपलक्षणं अंत्यजानाह्ययमः रजकश्चर्मकारश्चनटोवरुड
एवचकैवर्त्तमेदभिल्लाश्चसप्तैतेअंत्यजास्मृताइति तेनतेषामज्ञानतःसकृदन्नभोजनेधेनुद्वयम् आमान्नेसार्द्धकार्षा
पंप्रज्ञानेद्विगुणं अभ्यासेतुप्रायश्चित्तावृत्तिरिति यत्पुनर्नारदेनांत्यजानभिधायभुक्त्वाचैषांस्त्रियोगत्वापीत्वापःप्रति
गृह्यचकृच्छ्रार्द्धमाचरेत्ज्ञानादज्ञानादैन्दवद्वयमभिहितंतदष्टवारभोजनविषयंकृच्छ्राब्दस्त्रिंशद्धेनवःचांद्रायणद्वयेपं
चदशधेनवः अंत्यजानांज्ञानतःसकृदुच्छिष्टभोजनेतूशनाः अंत्यजानांभुक्तशेषंतुभक्षितोयैर्द्विजातिभिः चांद्रंकृच्छ्रं
तदर्धंचक्रमात्तेषांविशोधनम् कृच्छ्रंतप्तकृच्छ्रंतदर्द्धंतप्तकृच्छ्रार्द्ध शुष्कान्नेसिद्धान्नाद[illegible]शान्नभोजनेपादइतिशौण्डि
कापालिकांत्यजपीतसंवंधिजलपानेत्वापस्तंवः अज्ञानात्तुपिवेत्तोयंव्राह्मणोंत्यजस्यजातिभिः त्रिरात्रोपोषितोभूत्वापंचग

प्रा त्रनृत्यं कृष्णशूद्रः चांडालैः श्वपचैर्वापि छिन्नं यज्ञोपवीतकं मुनिभिस्तु विनिर्दिष्टं मन्त्रसांतपनद्वयम् अथ चांडालीग
...प्रायश्चित्तं अज्ञानतः सकृच्चांडालीगमने द्वादशवार्षिकं ज्ञानतस्तु मरणं यथा यमः चांडालीं ब्राह्मणो गत्वा भुक्त्वा च प्र
...पततस्य ज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति पतति द्वादशवार्षिकव्रतभाग्भवतीत्यर्थः ज्ञानात्साम्योपन्यासस्तु
...शवार्षिकव्रतनिषेधार्थः यथा यमः रेतः सिक्त्वा कुमारीषु चांडालान्त्यगनासु च सपिंडापत्यदारेषु प्राणत्यागो वि
धीयते अत्र प्राणत्यागे चतुर्विंशतिवार्षिकव्रतविधानात् भोजनं त्वज्ञानतो पृच्चत्वारिंशद्वारेण ज्ञानतश्चतुर्विंशतिवा
...तिसंद्वादशवार्षिकव्रताकरणे अशीत्युत्तरशतं धेनवो देयाः क्षत्रियादीनां पादपादहानिर्बालवृद्धरोगिणामर्द्धमि
...र्वैषां मरणमिति स्त्रिया अपि पुंसस्तुल्यं व्रतमाहांगिराः व्रतं यच्चोदितं पुंसां पतितस्त्रीनिषेवनात् तच्चापि का
२५ ...पतितामेविनीं स्त्रियम् अत्र अदितिनि देशात् स्त्रीत्वान्नार्द्धहानिरिति प्रतिग्रहे भोजनतुल्यं प्रायश्चित्तं धेनोरभावे
तन्मूल्यं चांडालजातिमज्ञायत देकच्च असे अपेक्षं नवः अंत्यजातिमविज्ञाय निवसेद्यस्य वेश्मनि स वै ज्ञानेन कालेन कुर्या राम
त्तत्र विशोधनम् चांद्रायणं पराकं वा द्विजातीनां विशोधनम् प्राजापत्यं तु शूद्राणां तथा संबद्धदूषणे इति चांडालान्न १९
भक्षणादि चांडाल्यभिगमनादि प्रायश्चित्तम् अथ शौंडिकाद्यन्नभक्षणादि प्रायश्चित्तं शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं

पोष्येत्यर्थः तदयंसंक्षेपः अज्ञानाच्चांडालाद्यन्नभक्षणेपादोनधेनुचतुष्टयज्ञानतः सार्द्धसप्तधेनवः बलात्कारतोभोजनेपंच
धेनवः शुष्कान्नेसर्वत्रार्द्धंश्चामान्नेतृतीयांशो अज्ञाननतस्तत्स्पृष्टान्नभोजनेधेनुरेकाज्ञानतोद्वेधेनूसर्वत्रोच्छिष्टेद्वैगुण्यं अ
ज्ञानतश्चांडालस्पृष्टजलक्षीरादिपानेपुराणेकैतिभ्यंकांचनंज्ञानतः पुराणद्वयलभ्यंकांचनं सर्वत्राभ्यासेप्रायश्चित्तावृत्तिःए
ततुब्राह्मणस्यविप्रेतुमकलंदेयंपादोनंक्षत्रियमेतम् वैश्येर्द्धंपादशेषंतुशूद्रजातिषुशस्यतइतिवृद्धहारीतवचनात् क्षत्रि
यादीनांपादपादहानिः स्त्रीबालवृद्धरोगिणांअर्द्धप्रायश्चित्तंधेनोरभावेतन्मूल्यंदेयंसंकल्पवाक्यं यथा अद्येत्यादिज्ञानकृत
चांडालसिद्धान्नभक्षणजनितपापक्षयकामोगिरअन्के चांद्रायणव्रतानुकल्पपयस्विसार्द्धसप्तधेनुमूल्यंसार्द्धद्वाविंशतिपुरा
[illegible]प्यकांचनमग्निदैवतमित्यादिसर्वत्रोहेनकार्य्यम दक्षिणायथाशक्तिदेयाविद्वद्भिप्रनृपस्त्रीव्यतिरिक्तानांयत्रदानेत्वि
दं [illegible]व्यंपूर्वेदिनेसशिखवपनंकृत्वाघृतंप्राश्योपोष्यपरदिनेसार्द्धसप्तदशधेनुमूल्यमुत्सृज्यब्राह्मणायदत्वायथाशक्तिद
क्षिणांदद्यात् ततःपार्वणविधिनाश्राद्धमित्य मुकस्यमतमेनदिति अथोच्छिष्टस्यचांडालादिस्पर्शप्रायश्चित्तंभुक्त्वोच्छिष्ट
स्त्वनाचांतश्चांडालैःश्वपचेनवा प्रमादात्स्पर्शनंगच्छेत्तत्रकुर्याद्विशोधनंगायत्र्यष्टसहस्रंतुद्रुपदांवाशतंजपेत अष्टसह
स्रमष्टाधिकमहस्रंत्रिरात्रोपोषितोभूत्वापंचगव्येनशुद्ध्यतीतिमिनित्वापादोनंप्राजापत्यम् चांडालादिस्पृष्टिन्नयज्ञोपवीतधेनु

प्रा· क· घृतंशकृत् प्राश्यापरेद्युरुपवसेत्कृच्छ्रंसांतपनंचरन्गततनद्युह्मसाध्यंतदशक्तोपुराणमेकंदद्यादितितोयमुपलक्षणंक्षीरादि
१८ गानेपि यस्तुचांडालसंस्पृष्टंपिबेत्किंचिदकामतः सतुसांतपनंकृच्छ्रंचरेच्छुद्ध्यर्थमात्मनः इत्यङ्गिरोवचनात् आपस्तंबः चांडा
लकूपभाण्डेषुयस्त्वज्ञानाज्जलंपिबेत् प्रायश्चित्तंकथंतत्रवर्णेवर्णेविनिर्दिशेत् चरेत्सांतपनंविप्रः प्राजापत्यंतुभूमिपः तद
र्धंश्यंपादंशूद्रस्यनिर्दिशेत् तदिदमभ्यासेअनभ्यासेतुदेवलः यस्तुचांडालभांडस्थमज्ञानादुदकंपिबेत् सतुत्र्य
ते... शूद्रस्त्वेकेनशुध्यति इदमज्ञाने ज्ञानतोद्विगुणं अत्रसांतपनंसप्ताहसाध्यंयथाब्रह्मपुराणंप्रथमेह्नि
नाश्नीयात्गोमूत्राशीततःपुनः तृतीयेगोमयाशीचचतुर्थेक्षीरपोभवेत् पंचमेदधिभुक्त्वैवघृतंषष्ठेपिबेदथ कुशोद
...कृच्छ्रंसांतपनेविधिरितितदशक्तौधेनुद्वयम् ज्ञानतश्चांडालोदकपानेत्रिरात्रोपवासपूर्वकंपंचगव्यपानमा
...डालेनतुसंस्पृष्टंयःपिबतिद्विजः त्रिरात्रोपोषितोभूत्वापंचगव्येनशुध्यति पंचगव्यंपयोगोशकृद्द्विगु
णंमूत्रं... धिर्विघाच्चतुर्गुणंघृतंचाष्टगुणंप्रोक्तंपंचगव्येतथादधि इतिआपस्तंबीयात् तथापृथग्गणोद्र्यर्थः अन्त्यजानित १८
चांडालपरिगृहीतकूपादिजलपानेभ्यासतोज्ञानेप्राजा पत्यचाण्डालपरिगृहीतासुयोज्ञानादुदकंपिबेत् तस्यशुद्धिःप्रजा
नीयात्प्राजापत्येननित्यशः आपदितुआपस्तंबः श्वपाकचांडालपरिग्रहेषुपीत्वाजलंशुध्यतिपंचगव्यैः पंचगव्यपानपूर्वंयुक्

त्रयवनदेशोद्भवाप्यवनादिति ज्ञानेतु तुल्यतयाद्विगुणव्रताचरणेपिनव्यवहार्य्यः कामतोव्यवहार्यस्तुवचनादिहृजापतइति
याज्ञवल्क्यात् पापाभावेकथं अव्यवहार्य्यइत्यतआहवचनादितितथाचपापस्यहृशक्तौनरकोत्पादिकाव्यवहारविरोधिकाचत
त्रकृतप्रायश्चित्तेनरकोत्पादकशक्तेर्विरहेपिव्यवहारविरोधिकाशक्तिरस्त्येवेतिभावः शुष्कान्नेपादःपक्वान्नेत्वर्द्धप्रायश्चित्तंपस्त
स्यभुक्तेपक्वान्नेकृच्छ्रार्द्धंतस्यनिर्दिशेत् शुष्कान्नभोजिनांपादमित्याहभगवान्मनुरिति विष्णुधर्म्मोत्तरीयात् तस्यद्वितीयसं
सर्गिणः शुष्कान्नमामान्नंसक्तुलाजादि चांडालस्पृष्टान्नभोजनेप्राजापत्यं चांडालस्पृष्टमन्नंतुयोश्नीयाद्ब्राह्मणः क्वचित् तस्यशु
द्धिंप्रवक्ष्यामिप्राजापत्यंननित्यशः एतदज्ञानतोज्ञानतोद्वैगुण्यमिति आज्ञानतःसकृच्चाण्डालाद्युच्छिष्टान्नभोजनेचांद्रायणं
र्दोपिपंचकःअंत्यानांभुक्त्वाशेषंतुभक्षयित्वाद्विजातयः चांद्रंकृच्छ्रंतदर्द्धंचब्रह्मक्षत्रविशांविधिः अयंक्षत्रियविशोःकृच्छ्रतदर्द्धवि
धानंतदायदिवलात्कारादन्नेनरतांबूलाद्युच्छिष्टभक्षणं अत्रज्ञाने आपस्तंवेनउच्छिष्टेचांद्रायणविधानाद्द्विःसमाचानुच्छिष्टे
तंप्रकृच्छ्रविधानात्सर्वत्रानुच्छिष्टेद्वैगुण्यमितिशूलपाणिः चांडालस्पृष्टोदकपानेसांतपनव्रतंयस्तुचांडालसंस्पृष्टंपिवेत्तोय
मकामतः सतुसांतपनंकृच्छ्रंचरेच्छुद्ध्यर्थमात्मनइत्यंगिरोवचनात् हारीतः चांडालस्पृष्टंपानीयंब्राह्मणस्तुयःपिवेत्प
ञ्चरात्रोपोषितोभूत्वापंचगव्येनशुद्ध्यति अनुत्तरितेतुसांतपनमधिकंसांतपनमाहयाज्ञवल्क्यः कुशोदकंचगोक्षीरंदधिमूत्रं

प्रा॰क॰ ११ इदं कामतो द्विगुणमिति वलात्सकृच्चाण्डालादीनामामान्नभक्षणे त्रिरात्रं सिद्धान्नभक्षणे प्राकृव्रतं विष्णुः चाण्डालान्नं भु
क्त्वा त्रिरात्रमुपवसेत् सिद्धान्नं भुक्त्वा पराकं कुर्यादिति वचनमेतद्बलाद्भोजनविषयमिति यद्यपि वन्नात्म वर्तमानस्य विप
स्य ज्ञानमस्त्येव तथापि स्वारसिकत्वाभावान्नज्ञानकृतपापमुक्तं यत एकमाह मनुः यथात्मनोऽप्रमत्तस्य द्वादशाहं न भोजनं पर
कोत्तामदोज्छ्रायं सर्वपापनोदनः यत एके पंच धेनवः इति शूलपाणिः धेनुद्वयमिति भवदेवः अत्रामान्ने सिद्धान्ने तुरीयभागप्रा
यश्चित्तं कर्तव्यमेकत्र निर्णीतः शास्त्रार्थमिति न्यायात् सर्वत्रान्नभक्षणे सिद्धान्ने तुरीयभागप्रायश्चित्तं स्वीकृतं यथापादमामा
न्नभक्षणमिति एतत्पापस्य उपपातकत्वेन तत्र तयाभावात् ज्ञानाभ्यासे चान्द्रायणाभ्यासः अज्ञानाभ्यासे तप्तकृच्छ्राभ्यासः तेन
ज्ञानतश्चतुर्विंशतिवारभोजने पातित्यं अज्ञानतोऽष्टचत्वारिंशद्वारभोजने च यथा मनुः चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य
च पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति अन्त्ये भवा अन्त्याः यतोऽधमजातयो न समर्तातिदीपकलिकाज्ञानात्सकृदभिगमने पाति
त्यं तत्र तु वक्ष्यामः चाण्डालश्वपचयोरन्नभोजने तुल्यं प्रायश्चित्तं देवलेन चाण्डालश्वपचयोर्वलात् मासमदासत्वापन्नद्विजस्य प्राजा राम
पत्यविधानात् सर्वत्र तुल्यप्रायश्चित्तं बोध्यम् यथा दासीकृतो बलात् म्लेच्छैश्चाण्डालाद्यैश्च दस्युभिः मासोषिते स द्विजातौ तु प्राजा १७
पत्यं विशोधनं त्वन्त्यं गोमांसखादको यस्तु विरुद्धं यस्तु भाषते सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते इति बोधायनोक्तेः त

नंदर्द्दनव ब्रह्मक्षत्रविट्शूद्रायोषाः प्रमाप्यतुवृत्तिंधेनुर्वेस्तमविक्रमादद्याद्विशुद्धयइति तत्प्रतिलोमजात्यंताभ्यश्चैसव्यभिच
रितस्त्रीविषयमितिश्चर्मनिर्मितंजीनइतिख्यातंवस्त्रमश्वागाः अविमेषः इदमज्ञानतः ज्ञानतोद्विगुणम् इतिस्त्रीवधप्रायश्चित्त
निर्णयः समाप्तः अथचांडालाद्यन्नभक्षणप्रायश्चित्तंतत्रसकृदभ्यासात्यंताभ्यासभेदेनव्यवस्थामुनिभिरुक्तेतितन्निरूप्यते
यद्यपिद्रवद्रव्यस्यकंठादधोगमनमात्रंपानंतच्चैकस्मिनप्रयोगेनेकधैवभवतितथाप्येकमेवपानं यथैकफलोद्देशप्रवृत्तक्र
तिव्याप्यानामेकोपक्रमकाणांव्यापारनिचयानामप्येकधात्वर्थत्वं तथात्राप्येकफलोद्देश्यकैकप्रपन्नोपक्रमाणांग्रासानामेक
स्मिन्प्रयोगेसकृदेकभोजनम् एवंपुनर्भोजनेभ्यासः त्रिर्भोजनेत्यंताभ्यासः प्रयोगभेदेशनभेदंव्यक्तमाह कात्यायनः मुनिभि
र्द्विरशनंप्रोक्तंविप्राणांमर्त्यवासिनांनित्यं अहनिचतथानमस्विन्यांसार्द्धप्रहरयामांतः अत्रज्ञानतः सकृच्चांडालान्नभक्षणेचां
द्रायणमज्ञानतस्तप्तकृच्छ्रंयथाहांगिराः अंत्यावसायिनामन्नमश्नीयाद्यस्तुकामतः सतुचांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवाचां
डालः श्वपचः क्षत्तासूतोवैदेहकस्तथा मागधायोगवौचेतिसप्तैतेंत्यावसायिनः ब्राह्मण्यांशूद्रज्जातः क्षत्ता ब्राह्मण्यांक्षत्रियाज्जा
तः सूतः ब्राह्मण्यांवैश्याज्जातोवैदेहकः क्षत्रियायांवैश्यान्मागधः शूद्राद्वैश्यायांजातः आयोगवः चांद्रायणेष्टौधेनवः तप्तकृच्छ्रेपा
दोनधेनुचतुष्टयंभवदेवस्तु चांद्रायणमत्रशिशुचांद्रायणं अत्रधेनुचतुष्टयंतप्तकृच्छ्रेधेनुद्वयंमिलित्वाषट्धेनवः अकामतः

प्रा·कृ· वैश्यावधे सार्द्धचत्वारिंशति धेनवः शूद्रावधे सपादैकादश धेनवः अज्ञानकृते द्विगुणमिति अज्ञानतो यद्गुणवधे यत् प्रायश्चित्तं तज्ज्ञा
तस्तद्गुणगर्भवधे तद्गुणो त्रैयीवधे च तत्प्रायश्चित्तं तेन ज्ञानतो ब्राह्मणीगर्भवधे षड्वार्षिकं क्षत्रियागर्भवधे त्रैवार्षिकं वैश्या
पैवधे सार्द्धवार्षिकं शूद्रागर्भवधे नवमासिकं यथा याज्ञवल्क्यः गर्भहा च यथावर्णं तथात्रेयीनिषूदन आत्रेयीगतो यागाधो
र्थ्यन्तं तथा वसिष्ठः रजस्वलामृतुस्नातामात्रेयीबाहुस्त्रयोदशाहानि रजस्वलायाः स्यात् तथात्रयोत्रऋतुस्नाता त्रयोद।
त्रेयी तेन षोडशदिनान्यात्रेयीत्यर्थः सकृत्सवर्णव्यभिचारितस्त्रीवधप्रायश्चित्तमाह याज्ञवल्क्यः अप्रदुष्टां स्त्रियं
शूद्रहत्याव्रतं चरेत् अप्रकर्षणाद्दुष्टां सवर्णव्यभिचारितामित्यर्थः अत्र दुष्टस्त्रीवधप्रायश्चित्तस्योक्तत्वादिति अत्र सकृ
त्सवर्णव्यभिचारितब्राह्मण्यादीनामकामतो वधे ब्राह्मणादिवर्णजातशूद्रवधप्रायश्चित्तं कर्तव्यं यथा ब्राह्मणजातशूद्रवधे ग
तमः संवत्सरं पंचदश धेनुव्रतं कृत्वा वृषभैकादश गाश्च दद्यादिति क्षत्रियजातिशूद्रवधे शंखः शूद्रवधे जातशूद्रवधे वा व्दादशव्र
तं गोप्रदानं च वैश्यजातशूद्रवधे काश्यपः शूद्रे सार्द्धं नंतिलधेनुं च दद्यादिति तथा शूद्रवधे प्रोक्तं तत्र कृच्छ्रं अत्रायं संक्षेपः अ गम
कामतः सकृत्सवर्णव्यभिचारितब्राह्मणीवधे पंचदश धेनवः वृषभैकादश गावो दक्षिणा तथा क्षत्रियावधे द्वौ धेनवः गां द। १६
क्षिणा तथा वैश्यावधे नव यथाशक्ति दक्षिणा शूद्रावधे धेनुद्वयं यथाशक्ति दक्षिणा ज्ञानतो द्विगुणमिति यत्तु याज्ञवल्क्यवच

त्रैवार्षिकादिकं मनुवचनात् ज्ञानतस्तु षट् वर्षाणि राजन्ये त्रीणि वर्षाणि वैश्ये सार्द्धं शूद्रे इति हारीतवचनात् षड्वर्षादिकमा
हस्थूलपाणिस्त्विदं सगुणादिविषयमाह अत्रापि स्त्रीवृद्धानां गतषोडशवर्षीयबालानामर्द्धं पंचवर्षादूर्द्ध्वमेकादशवर्षपर्यंतं
पादमात्रं द्रष्टव्यम् संकल्पवाक्यं यत्र दानं च गोवधप्रकरणोक्तरीत्या संगृह्य देयमिति प्रयोजकादीनां पादपादहानिर्द्रष्टव्या अन्या।
न्यधिकप्रायश्चित्तबोधकवचनानि पदस्थाभिषिक्तब्राह्मणादिपूजकसगुणक्षत्रियादिवधभेदेन व्याख्येयानि कलौ तदभावा
न्नलिखितानि इति क्षत्रियादिवधे निर्णयः अथ प्रतिलोमजजातिवधप्रायश्चित्तं तत्र याज्ञवल्क्यः चांद्रायणं चरेत्सर्वानपकृष्टा
न्निहत्य तु शूद्रोऽधिकारहीनोऽपि मासेनानेन शुध्यति प्रतिलोमजा मागधायोगवादयः क्षत्रियायां वैश्यात् मागधः वैश्यायां वैश्यात् आयोगवः
गतस्व ज्ञानतः रजकादिवधेऽपि अज्ञानतो वधे एकैकरजकादिवधेऽपि ज्ञानकृते चांद्रायणमज्ञानकृते पराकः तथा चांगिराः सर्वा
न्त्यजानां गमने भोजने सप्रमापणे पराकेन विशुद्धः स्यादित्यांगिरसभाषितं अन्त्यजागमने [illegible]कामपूर्वं सकृदज्ञानत एवं इति
प्रतिलोमजातिवधप्रायश्चित्तम् अथ स्त्रीवधप्रायश्चित्तं तत्र निर्गुणब्राह्मणादिस्त्रीवधेऽनेन स्याकामतो ब्राह्मणीवधे षड्वार्षि
कं क्षत्रियावधे त्रैवार्षिकं वैश्यावधे सार्द्धवार्षिकं शूद्रावधे नवमासिकं स्वज्ञा। क्रतोर्द्धमिति यथाह हारीतः क्षत्रियवद्ब्राह्मणीषु वैश्य
वत् क्षत्रियासु शूद्रवद्वैश्यासु शूद्रासु अर्द्धमिति तत्रायं संक्षेपः ब्राह्मणीवधे नवतिर्धेनवः क्षत्रियावधे पंचचत्वारिंशद्धेनवः

प्रा॰ क॰ १५ क्रमम् इति गवेतरपश्वादिवधप्रायश्चित्तनिर्णयः अथ क्षत्रियादिवधप्रायश्चित्तनिर्णयः अज्ञानकृतक्षत्रियवधे त्रैवार्षिकमब्दाव्र
तं तदशक्तौ पञ्चचत्वारिंशद्धेनवो देयाः तथा वैश्यवधे सार्द्धवार्षिकं तदशक्तौ त्रयोविंशतिर्धेनवो देयाः तथा शूद्रवधे नवमासि
कं तदशक्तौ द्वादश धेनवः यथाह मनुः तुरीयो ब्रह्महत्यायाः क्षत्रियं विज्ञाय॰ भवदेवः कृत्स्नं वेदं गुरुपूजागुणशालिनं मन्यमिदि
॰ग्रहः प्रवर्त्तनं हितानां चनत्सर्वं वृत्तमुच्यते एतच्च सर्ववर्णोत्तमवर्णकृतं क्षत्रियादिवधविषयं अधमवर्णकृते तु अध
॰वर्णानामुत्कृष्टहनने गुरुं दोषा गुरुतरं ज्ञेयः क्षत्रादीनां न संशय इति भविष्यपुराणात् ॰उत्तमवर्णक्रमेणाधमानां द्विगुणप्रा
॰सकलं देयमिति वचनमभक्ष्यभक्षणविषयमिति शूलपाणिः भवदेवस्तु अधमानां द्विगुणमिति वचनं प्रकरणात् ब्रह्मवध
॰यं विप्रे तु सकलं देयमिति ब्रह्मवधे तत्सकलविषयं अज्ञानकृतजातिमात्राश्रितक्षत्रियवधे तु प्राजापत्यानि नवं वैश्य
वधे प्राजापत्यचतुष्टयं नाद्दशशूद्रवधे प्राजापत्यद्वयम् ज्ञानेन तु सर्वत्र द्विगुणं यथा संवर्त्तः हत्वा तु क्षत्रियं मोहात्त्रिभिः कृच्छ्रै
र्व्यपोहति अत्र बहुवचनात् कृच्छ्रत्रये सिद्धे त्रिभिरिति पदोपादानं कृच्छ्रत्रयत्रिगुणत्वप्रतिपादनार्थं वैश्यहत्यां तु संप्राप्य कुर्याच्चैद राम १५
व मोहितः कृच्छ्रातिकृच्छ्रं कुर्वीत नरो वैश्यघातकः मोहाच्छूद्रवधं प्राप्य तप्तकृच्छ्रं समाचरेत् कृच्छ्रातिकृच्छ्रौ यथा याज्ञवल्क्यः
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिः पयोव्रतम् अत्र ॰ ॰वतुष्टयं अत्र भवदेवः अज्ञानकृतहन्तव्यक्षत्रियादिवधे

यसींदधान्यपं हत्वा द्विजोत्तमः पलालभारकं खंडं सीसकं चैव माषकम् कार्ष्णायसीं अभ्रीं लोहमयीं कुद्दालिकां षंडं नपुं
सकं नच्च मृगाभिप्रेतम् याज्ञवल्क्यः मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः हत्वाश्यहं पिवेत्क्षीरं कृच्छ्रपादादिकं त्वरे।
त् अत्र पतत्रिणः पूर्वोक्तातिरेकेणाभिमताः कृच्छ्रपादश्चोक्तः एतानि कृताभ्यांस्तु विषयाणि सकृद्वधे संवर्त्तः हत्वा हंसब
लाकां श्वश्वाविल्कूरबबर्हिणः वानरश्येनभासौ च त्र्यहं हत्वा क्षिपेद्द्विजइति अत्र त्र्यहोपवासेन सार्द्धकार्षापणादिति अ
ज्ञानकृतेन्त्वर्द्धं शूद्रहत्याव्रतमभिधायोक्तं अस्थिमतां सहस्रं तथानस्थिमतामनडुहि अस्थिमतां कृकलासादीनां सहस्र
मनडुद्देन च्चानस्थिमतां जलौकादंशमशकादीनां शकटवहनीयराशिवधे शूद्रहत्याव्रतं तत्र मोद्धात् शूद्रवधं प्राप्यतव्रकृ
च्छ्रं समाचरेदिति प्रवचनविषयं तप्तकृच्छ्रमनुक्तम् यथा तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानि लान् प्रतित्र्यहं पिवेदुष्णा
न्सकृत्स्नायीसमाहितः एतत् द्वादशाहमाध्यंतत्प्रानिलयानंतप्तक्षीरवाप्यायायानं अत्र ...नधेनुचतुष्टयदानमाह शू
लपाणिः इयमिति भवदेवभट्टः अस्थिमदल्पप्राणिवधे किंचिद्विद्वान्यादिकं देयं अनस्थिमदल्पप्राणिवधेतु प्राणायाम
मात्रं करणीयं तथा च मनुः किंचिद्देयं ब्राह्मणाय धान्यमस्थिमतां वधे अनस्थ्नां तां हिंसायां प्राणायामेन शुद्ध्यति अत्र ब्राह्मणा
णाक्षत्रियविट्शूद्राणां तुल्यं प्रायश्चित्तम् शूद्रस्त्रीबालवृद्धानां अर्धमिति शूलपाणिः भवदेवेन क्षत्रियादीनां पादहानिरुक्त्यु

प्रा॰क॰ स्यगर्तेकांतागदौस्त्रियुतेतदानेत्यर्थः शंकारहितस्थाने सति पालके दोषाभावस्तत्र स्मृतिः स्वदारमेतु विपिने निर्भयेर्वृकवर्जि
१४ ते आगत्य वृकव्याघ्राद्यैः स्वादितैर्नास्ति दूषणं नारदः राजगृहं गृहीतो वा वज्रादिभिर्हतोपि वा अथ सर्पेण वा दष्टो [illegible] पति।
तो भवेत् व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः न तत्र दोषः पालकस्य न च दोषोस्ति गोमिनाम् पराशरः ग्रामघाते शरौघेन
वेश्मभंगा [illegible] पातने अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते इदं च बंधनव्यतिरेकेण पालकस्य प्रत्येव बोध्यं प्रायश्चित्तपरिक्षण
स्वशिरसा यवसमादाय गोभ्यो दद्यात् यदि ताः प्रमुदिता गृण्हीयुः अथैनं प्रवर्तयेयुः इति यवसं तृणं यनं कृतसप्राय
येयुः कर्मणीति शेषः यदि गावस्तद्दत्तं तृणं न गृण्हीयुस्तदा पुनः प्रायश्चित्तमिति इति गोवधप्रायश्चित्तनिर्णयः अ
श्वतरपशुपक्षिसर्पादिवधप्रायश्चित्तनिर्णयः हयं हत्वा वासोदानं हस्तिवधे पञ्चनीलवृषदानम् अजमेषगर्दभश्च प्र
त्येकगवाहयस्त्वेकहायनवृषदानम् यथा यमः वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजे अजमेषमनड्वाहं खरं हत्वैकहायः
नं हंसादिवधे गोदानं हंसं हत्वा बलाकां च तथा बर्हिणमेव च वानरं श्येनभासौ च प्रयच्छेद्ब्राह्मणाय गां क्रव्यादांश्च मृगान्हत्वा रामे १४
धेनुं दद्यात्पयस्विनीम् अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं क्रव्यादा व्याघ्रादयः मृगाः कृष्णसारादयः अक्रव्यादा महिषादयः क्र।
व्यालं तन्परिमितसुवर्णं घृतकुंभं वराहं च तिलद्रोणं च तित्तिरौ शुकं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनं अभ्रीकार्ष्णा

दशागभेदत्रयत्नेरपि कुर्वतां द्विजानां गोहितार्थं यत्र प्रायश्चित्तं न विद्यते अत्र द्विजानामिति पाठान्तरं गूढगर्भो नष्टगर्भः
देवद्रोण्यां विहारकूपेष्वायतनेषु च एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते देवद्रोणी स्वयंभूलिंगाद्यवस्थानगर्त्तः विहा
गमैथुनं आयतनं सीमा अत्र कूपपतनकर्तुर्दोषाभावः ननु गोस्वामिन इति सायंसंयमनार्थं तु न दुष्येद्द्रोधबंधयोः पंकलग्ना
ग्निदाहेषु प्रायश्चित्तं न विद्यते मूर्छितः पतितो वापि यदि दण्डाहतः पशुः उत्थितेस्तु सदा गच्छेत्पञ्च सप्त पदानि वा ग्रासं वा
यदि गृह्णीयात्तोयं वापि पिबेत्स्वयं पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते अस्यार्थः यदि पूर्वव्याधियुक्तानां गवां दंडाद्यै
रभिघातेन मूर्छया पतनं भवति अनंतरं गमनग्रासादौ कृते मरणं भवति तदा गमनग्रासतोयपानानंतरं मरणहेत्वभावे वि।
निश्चितं पूर्वव्याधिविनष्टानां न प्रायश्चित्तं यदि पूर्वव्याधिरहितगवप्रहारजनितव्याधिना ग्रासादिकं कृत्वा मृते तदा प्राय।
श्चित्तमस्त्येव अग्निप्रज्वालनत्र स्थितस्य दैवात्तदग्निना बंधरहितस्य मरणे दोषाभावमाह पराशरः कूपे खाते च धर्मार्थे ग
हदाहे च या मृता ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते चर्मनिर्मोचनप्रायश्चित्तापवादमाहांगिराः अन्यत्रांकनलक्ष्मभ्यां वा
हनिर्मोचने पि वा अंकनं त्रिशूलादिकरणं लक्ष्म स्थिरतरचिन्हं वाहनेन चर्मनिर्मोचनं स्मृतिसागरे अंगिराः अरक्षितेनु
कूपादौ मृते व्याघ्रादिक्षिप्ते व्रतार्द्धमाचरेत्स्वामी रक्षिते नास्ति दूषणमिति रक्षितद्वंति परमंत्वयोर्यदि निवारयंति पालकीर्मतिक्र

णेस्वामिनो दोषमाह हारीतः दमने दामने चैव संघाते चैव योजने स्तंभशृंखलपाशैर्वा मृते पादोनमाचरेदिति प्राजापत्यस्य
प्रा·क· वपादोनपूर्वेण सहैकवाक्यत्वात् तथा मनुः घंटाभरणदोषेण गवां यत्र विपद्भवेत् । चरेदर्द्धव्रतं तत्र भूषणार्थं कृतं हि तत् ए
१३ कृहायन्यादिवधे त्वाह यमः कान्तारेष्वथवा दुर्गे गृहदाहे वटेषु च यदि तत्र विपत्तिः स्यात् [illegible]को विधीयते तथा पादश्चात्र
नेने वत्सस्वामिन्यरक्षिते अप्रातिके अप्राप्तदम्यावस्थे त्रिहायनपर्यंतमिति यावन्नश्च प्रा[illegible]ना मृते स्वामिना प्राजापत्यपादः
तम्लेच्छस्थाने गोविक्रये विनिमये च चांद्रायणं यदि तेन वधः क्रियते न तदा ज्ञानकृतं प्रा[य]श्चित्तं विक्रयं गोविनिमयं कृत्वा
नवादके व्रतं चांद्रायणं कुर्याद्गोवधे साक्षाद्धर्मो भवेदिति गोभिलवचनात् चांद्रायणपदं शिशुचांद्रायणपरम् पापस्यलघुत्वा
दिति तद्यथा चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः चतुरोस्तमिते सूर्ये शिशुचांद्रायणं स्मृतमिति तत्र दानं धेनुचतुष्टयं पा
पस्यलघुत्वादिति अथ पालकप्रायश्चित्तं अविभक्तपालकानामेकेन प्रायश्चित्तं करणीयं विभक्तानां पादः पादो बहूनां गवामपा
लनवधे द्विगुणं तत्रापि बहुकर्तृके प्रत्येकं द्विगुणमिति पालकस्य द्रव्याभावे स्वामिना द्रव्यं दत्वा प्रायश्चित्तं कारयितव्यं स्वेन वा गर्म
करणीयं म्लेच्छपालके स्वामिना कर्तव्यमिति अथ गोवधापवादः संवर्तः यंत्रणे गोचिकित्सायां मूढगर्भविमोचने यत्नेक १३
नेविपत्तिः स्यात्प्रायश्चित्तं न विद्यते औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च प्राणिनां प्राणकृत्यर्थे प्रायश्चित्तं न विद्यते दाहच्छे

गविद्युद्धतापिवा श्वभ्रेवपतिताकस्मात् श्वापदैर्वापिभक्षिताप्राजापत्यंचरेत्कृच्छ्रं गोस्वामीव्रतमुत्तमं सशिखंवपनंकार्यंत्रिसं
ध्यमवगाहनं शृंगैर्वापिखुरैर्युक्तंलांगूलश्रवणादिभिः आर्द्रमेवहितच्चर्मपरिधायसगांव्रजेत् तासांमध्येवसेद्रात्रौदिवाताभिः
समंव्रजेत् ब्राह्मणस्यविशेषेणतथाराजन्यवैश्ययोः प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनम् अनडुत्सहितांगांचदद्याद्विप्रा
यदक्षिणां अत्रगोस्वामीत्युपादानादुत्सृष्टवृषवत्सतरीषुस्वत्वाभावादपालननिमित्तवधेउत्कृष्टदोषोनास्तीतिप्रतीयतेअत्र
स्मार्ताः अत्रेतिकर्त्तव्यतासहितप्राजापत्याकरणेधेनुद्वयदानंवृषभोगौश्चदक्षिणाएवंचशूद्रस्वामिकेतरविषयाशूद्रस्वामि
कस्याज्ञानात्साक्षाद्वधेयत्किञ्चिद्दक्षिणाकृच्छ्रद्वयंविधानादपालनविधेरधिकस्यायुक्तत्वाद्वधतुल्यकृच्छ्रद्वयमित्याहुः
शूलपाणिप्रभृतिभिस्त्वितिकर्तव्यतायांविशेषोनादृतः तन्मतेप्राजापत्यंतदशक्तौधेनुरेकावृषभोगौर्दक्षिणेतिएतच्चपा
लकासमर्पणेतत्समर्पणेतुपालकस्यैवदोषोनतुस्वामिनः यथाहबृहस्पतिः अनागतस्यप्र[illegible]नता आगतस्यापिरक्षितारात्रा
वपियदान्योस्तितदास्वामीनदोषभाक् मनुः दिवावक्तव्यतापालेरात्रौस्वामिनितद्गृहे योगक्षेमेन्यथाचेत्तुपालोवक्तव्यतामि
यात् अस्यार्थः दिवापालकहस्तन्यस्तानांगवांयोगक्षेमविषयेजातेपालकस्यगर्हणीयता रात्रौपुनःपालकप्रत्यर्पितानांस्वामि
निदोषः अन्यथादिवारात्रावपियदिपालकहस्तगताभवतितदापालकएवदोषभाग्भवतिनस्वामीत्यर्थः अशक्तपालकेसमर्प

प्रा॰क॰ त्ववाचनिकम् तत्र धेनुरेका एवं मुष्कनाशकरणे पूर्वोक्तस्वामिभेदेन एकद्व्यादिक्रमेण प्रायश्चित्तं करणीयं प्रयोजकस्य तदर्द्धं।
१२ मिति स्वयं वृषभवाहने द्वे धेनू योषितो वाहने च तिस्रो धेनवः एवं कपिलावाहनेपि उत्सर्गोप्येवमेव ॐ अद्येत्यादि ...वास्थिभङ्गजा।
न्यपापक्षयकाम इमां धेनुं रुद्रदैवतां ब्राह्मणायाहं ददे यत्र दाने तु सशिखवपनं कृत्वा पोषे परदिने स्थिभङ्गजनितपापधेनु
दानं करणीयं यथाशक्ति दक्षिणा देया ब्राह्मणभोज्यदानं च करणीयं अमुकस्य ममैतदिति एवं मुष्कनाशादावूहेन लेख्यं लिङ्गस्य
छेदने मृत्यौ मध्यमं दण्डमर्हतीति याज्ञवल्क्येन मृत्युलिङ्गच्छेदयोस्तुल्यत्वाभिधानात्प्रायश्चित्तमपि तथेति मध्यमो मध्यममा
नः अथाशीतिपणसाहस्रो दण्ड उत्तमसाहसः तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमः स्मृतः अथ पालननिमित्तगोवधप्रायश्चित्तनि
र्णयः अविभक्तानां भ्रातॄणां मध्ये सर्वानुमत्यैकेन प्रायश्चित्ताचरणे सर्वेषां पापक्षयार्थं न प्रायश्चित्तं भ्रातॄणामविभक्तानामेको
धर्माः प्रवर्त्तते विभागे सति धर्मोपि भवेदेषां पृथक्पृथगिति नारदवचनात् पञ्चमहायज्ञादौ तथा दर्शनाच्च पाठो होमश्चातिथी
नां सपर्या तर्पणं बलिः एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामका इत्यमरः तथा भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ इष्टवन्तो भवि रा॰म॰
ष्यति त्वयि एव निपार्थी वेति युधिष्ठिरेण प्रायश्चित्ते कृते सर्वेषां पापनाशनादिति अथ प्रायश्चित्तं तत्र पराशरः शृङ्गानिलहतावे १२
व उद्बन्धनमृतापि वा शून्यागारादुपेक्षायां प्राजापत्यं विनिर्दिशेत् अपालनाद्विनश्यन्तु गोश्चरन्ती कथंचन जलौघे प्रत्ववे...ना

न्यत्राप्यूद्देनोत्सर्गे वा कपिले त्र्यब्दमिति अथास्थिभंगादिप्रायश्चित्तनिर्णयः तत्र भवदेवभट्टधृतयमवचनं अस्थिभंगं गवां कृत्वा लां
गूलच्छेदनं तथा पाटने कर्णशृङ्गाणां मासार्द्धं तु यवान् पिबेत् स्मृतिसागरे गोभिलः कर्णलाङ्गूलयोश्छेदमस्थिभङ्गं विधाय च प्रा
जापत्यव्रतं कुर्युश्चत्वारो ब्राह्मणादयः अत्र शूद्रस्य द्विजतुल्यत्वाभिमानं वैश्यतुल्यशूद्रपादं इदं गोर्मरणे षण्मासोपरि कर्त्त
व्यं षण्मासाभ्यंतरमरणे तु संपूर्णप्रायश्चित्तकरणे नाधिकेन शृङ्गभङ्गादिप्रायश्चित्तं सिद्धमिति स्मार्त्ताः यथा यमः शृङ्गभङ्गे
स्थिभङ्गे च कटिभङ्गे तथैव च यदि जीवति षण्मासात् प्रायश्चित्तं न विद्यते अस्यार्थः षण्मासोपरि मरणे तन्निमित्तकं प्रायश्चि
त्तं निश्चितमिति स्मृतिसागरे गोभिलः मुष्कमोषकरो विप्रो व्रतं चान्द्रायणं चरेत प्रयोजकस्तु कुर्वीत तस्यार्द्धं हि विशुद्धये मु
ष्कमोषको गोबीजकोषनाशकः हलैर्वा शकटैर्वापि वाहयेद्यो वृषं स्वयं प्राजापत्यद्वयं कुर्याद् द्विगुणं योजिता गवां वृषभं तु समु
न्मुष्कं कपिलां वापि कामतः योजयित्वा हले कुर्याद् व्रतं चान्द्रायणद्वयम् तत्रायं संक्षेपः कपिलोत्सृष्टवृषयोर्वाहने तुल्यप्रायश्चित्त
दर्शनात् कपिलावधे यत्प्रायश्चित्तमुक्तं उत्सृष्टवृषभवधे तत्करणीयं किंत्वयं विशेषः वृषभस्योत्सृष्टत्वेन स्वत्वाभावेऽपि पूर्वस्वत्व
मादाय व्रतं करणीयं तस्मादुत्सृष्टपूर्वस्वत्वाश्रयीभूतयत्स्वामिकगोवधे यत्प्रायश्चित्तं तत्स्वामिकगोवधस्य द्विगुणं प्रायश्चित्तं अस्थि
भंगादिकरणे षण्मासाभ्यंतरे गोर्मरणे पूर्वोक्तस्वामिकभेदेन गुरुलाघवन्यायादिक्रमेण प्रायश्चित्ताचरणं षण्मासोपरि मरणे प्राजाप

प्रा·क· लैर्नचतालशालैर्नचापिमौंजैर्नचशृंखलैश्च एतैस्तुगावोनचवंधनीयावद्धानुतिष्ठन्त्यपरंशृगृह्णीत्वा कुशैः काशैश्चवं·धा यात्स्या
११ नेदोषविवर्जिते अत्रायंसंक्षेपः क्षीणायाअक्षीणाभ्रमरोधनिमित्तकवधे प्राजापत्यस्यपादस्तत्रद्वादशपणा[illegible]वधे
ड्डिपादस्तत्रचतुर्विंशतिपणाहलयोजनेत्रिपादस्तत्रचतुरधिकाद्वात्रिंशत्पणायथोक्तदंडप्रहारागन्मृतभीतिदर्शनाद्वाकूपादौमि
न्त्यमृतेप्राजापत्यंतत्रधेनुरेकाक्षेण्यज्ञानेतुरोधनेचांद्रायणेशोधेनवः परिमाणादधिकदंडप्रहारेत्वज्ञानेनप्राजापत्यद्वयंत
धेभृज्ञानेचांद्रायणद्वयंतत्रपंचदशधेनवः चांद्रायणंयथापराशरः एकैकंह्रासयेत पिण्डंकृष्णेशुक्लेचवर्द्धयेत उपस्पृशां
स्त्रिषवणमेतच्चांद्रायणंस्मृतम एवमेवंविधंकृत्स्न माचरेद्यवमध्यमं शुक्लपक्षादिनियतंचरेच्चांद्रायणव्रतंइदंचांद्रायणव्रतंमा
ईसमधेनुदानसममितितत्रवृषभसहितागौर्दक्षिणा चांद्रायणेनतश्चीर्णंकुर्याद्ब्राह्मणभोजनं अनडुत्सहितांगांचदद्याद्विम्न
यदक्षिणामितिमनुवचनात उत्सर्गवाक्यंतु ॐ अद्येत्यादिब्राह्मणस्वामिकगोरक्षीणवुद्धिकृतरोधननिमित्तकवधजन्यपाप
क्षयकामः पराशरोक्तधेनुपादमूल्यमिदंकांचनंवह्निदैवतंअमुकगोत्रायब्राह्मणायाहंददे यत्रदानेनुपूर्वदिनेनखच्छेदनंका गा·
रयित्वाघृतंप्राश्यापोष्य परदिनेब्राह्मणस्वामिकक्षीणगोरक्षाणबुद्धिकृतारोधननिमित्तकगोवधजन्यपापक्षयकामःप्राजा १
पत्यपादानुकल्पधेनुपादमूल्यहिरण्यदानरूपप्रायश्चित्तंकुर्यात यथाशक्तिदक्षिणाभोज्यदानंचेति अमुकस्यमतमेतद

च्छमज्ञाननताडने इत्याभ्यां सहैकवाक्यत्वादज्ञानश्रुतेरबुद्धिपूर्वकवधविषयम् अज्ञानं च क्षीणायामक्षीणाभ्रमः क्षौण्यज्ञाने
तुप्रायिकं मरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादादिकम् यथाहारीतः नासाच्छेदनदाहेषु चर्मच्छेदनबंधने अतिवाहातिदोहा
भ्यां कृच्छ्रं चान्द्रायणं चरेत् हत्वेति शेषः कृच्छ्रं व्रतं तेन चान्द्रायणव्रतमिति शूलपाणिः भवदेवसुयत्स्वामिकगोवधे यत्प्रायश्चित्त
मुक्तम् तस्यैव पादादिकं बोध्यं तेन क्षीणायाअक्षीणाभ्रमे रोधादिना अज्ञानकृतस्यैव पादादिकरणीयम् क्षौण्यज्ञाने तु ज्ञानकृत
वधस्य पादादिकमाह तन्मते पराशरबृहस्पतिवचनं अधमशूद्रस्वामिकायागोः क्षीणायाअक्षीणाभ्रमेण रोधादिना मरणे
त्रिगुणं चान्द्रायणबोधकं हारीतवचनं च ज्ञानकृतवैश्यस्वामिकगोवधविषयमिति न किञ्चिदनुपपन्नमिति युक्तम् शूलपा
णिमते तु सर्वस्वामिकवधप्रायश्चित्तमाह तद्वैषम्यं दुष्परिहरणीयमिति यथाज्ञानकृतशूद्रस्वामिकवधे प्राजापत्यचतुष्ट
यम् क्षौण्याज्ञाने तु चान्द्रायणमिति अत्र बंधनपदं यथाकथंचिन्निमित्तपरम् बृहस्पतिः शस्त्रादिना तु हत्वा गां मानवं व्रतमा
चरेत् रोधादिना त्वाङ्गिरसमापस्तंबोक्तमेव चेति बृहस्पत्युक्तस्य शस्त्रादीन्यादिपदान्मुष्टिलोष्टलगुडविषयाग्न्यादीनां प्रापिका
मृत्युफलानां ग्रहणं रोधादिनेत्यत्र रोधस्य यथाकथंचिन्निमित्तमात्रस्य वंधादेरिति शूलपाणिव्याख्यानात् रोध[illegible]यम
नार्थं बंधनं रोधव्यतिरिक्तविषयं सायंयमनार्थं तु न दुष्येद्रोधबंधयोरित्यङ्गिरोवचनात् बंधने विशेषमाह व्यासः नवौरिके

प्रा·क निलघुप्रायश्चित्तानियानितानिप्रयोजकानुग्रहकानुमंतृनिमित्तिविषयाणिबोध्यानि अथपंचवधवधकर्तृत्वनिर्णयः नरां
१० तरव्यापाराव्यवधानेनवधनिष्पादकः कर्त्ता योप्रवृत्तंपुरुषंवधार्थंप्रवर्त्तयतिचेतनादिना प्रवृत्तंमतिमंत्रोपायैरुद्दप्रोत्साह
यतिवासप्रयोजकः एवंहन्मीतिवाक्येनुमतिदानानिषेधक्षमोपिमौनवर्त्तिचानुमंतावध्यस्यपलायनादिनिरोधकोनुग्राहकः उ
द्देश्यत्वेसतिहंतुर्मन्यूत्पादकोनिमित्तीप्रयोजकादीनांव्यवहितमरणफलकानांपादपादहानिरितिशूलपाणिः अष्टमाष्टमभाग
हानिरितिभवदेवः अथरोधादिनिमित्तगोवधप्रायश्चित्तनिर्णयः तत्रांगिराः पादंचरेद्रोधवधे द्वौपादौबंधनेचरेत् योजनेपाद
हीनंस्याच्चरेत्सर्वंनि पातनेरोधआहारप्रचारनिर्गमविरोधः बंधनंअयथाबंधनं अकालबंधनञ्च योजनेहलादियोजनेअ
तिवाहादिनेतिशेषः निपातनेदण्ड निपातनेदण्डेत्रिहस्तप्रमाणोग्राह्यः अंगुष्ठमात्रः स्थौल्येनबाहुमात्रः प्रमाणतः सार्द्रश्चस
पलाशश्चदंडइत्यभिधीयते अस्माद्दूर्द्ध्वंप्रहारेणयदिगांविनिपातयेत् द्विगुणंतुभवेत्तत्रप्रायश्चित्तमिति स्थितिरित्यंगिरोवच
नाम् सपलाशःपवित्रःनिपातनेकूपावटादिनिपातनइतिभवदेवः वस्तुतोनिपातनपदमुभयपरम् अन्यथैकग्रहणेनिपा राम
तस्यप्रायश्चित्तिजनकभयप्रदर्शकस्यानध्यवसायापत्तेरितिपादादिकंतुप्राजापत्यस्यैवयथापराशरः रोधेतुचरेत्पादंबंध
नेचार्द्धमेवचयोजनेपादहीनंस्यात्प्राजापत्यंनिपातने बृहस्पतिः पादंचरेद्रोधवधेकृच्छ्रार्धंबंधघातने अतिवाहेचपादोनंह १०

त्येकेनकरणीयं अथाब्राह्मणस्वामिकैकहायनीवधेप्रत्येकंसपादचतस्रोधेनवः द्विहायनीवधेप्रत्येकंसार्द्धाष्टौधेनवः त्रिहा
यनीवधेप्रत्येकंपादोनत्रयोदशधेनवः चतुर्हायनीवधेप्रत्येकंसप्तदशधेनवः एवंक्षत्रियस्वामिकैकहायन्यादिवधेक्रमेणप्र
त्येकंत्रिषट्द्वादशधेनवः एवंवैश्यस्वामिकैकहायन्यादिवधेक्रमेणप्रत्येकंद्विचतुःषडष्टौधेनवः शूद्रस्वामिकवधेप्रत्येक
मेकद्वित्रिचतुर्धेनवः अधमशूद्रस्वामिकवधेतुप्रत्येकमर्द्धैकसार्द्धद्वि धेनवः क्रमेणएवंद्वाभ्यामेकांदत्वाअन्याहननेच
प्रायश्चित्ताद्दतिरिति अथवाचनिकदक्षिणानिर्णयः तत्रज्ञानतोब्राह्मणसंबंधिगोवधेत्रैमासिकप्रायश्चित्तेवृषभैकादश
गावोदक्षिणादेयाः अज्ञानतोर्द्धव्रतेधेनुरेकेतिज्ञानतोवैश्यस्वामिकगोवधव्रतेद्वेधेनूअज्ञानतोर्द्धव्रतेधेनुरेका अन्यत्रव
चनाभावात् यथाशक्त्याइति भवदेवस्तुक्षत्रियसंबंधिचतुर्हायनीकपुङ्गवधे वृषभोदक्षिणास्त्रीगोवधेमृतवत्सागौर्द
क्षिणादेयादित्याह यत्रयादक्षिणोक्तातत्रप्रायश्चित्तद्विगुणवचनेतुद्विगुणासाकार्या द्विगुणेतुव्रतेचीर्णेद्विगुणादक्षिणा
भवेदितिपूर्वोक्तवचनात् यत्तुवैश्यंहत्वात्रैवार्षिकंचरेत् वृषभैकादशागाश्चदद्यादित्यभिधायगाश्चवैश्यवदितिगोवधेय
त्रैवार्षिकंप्रायश्चित्तंगौतमेनोक्तम् तदग्निहोत्रिणोवेदपारगस्यहोमधेनोः कपिलायागर्भिण्याश्चपुण्येदेशेकालेबुद्धिपूर्वकेव
धेवोध्यं समद्विगुणसाहस्रप्रमाणलक्ष्यंचयथाक्रमंदानेफलविशेषःस्याद्धिमायांतद्द्वेवहीतिदक्षवचनात् एवंमुन्यंतरोक्ता

प्रा॰का॰ नतो ब्राह्मणस्वामिक उत्पन्नमात्रगर्भवधे सपादैकविंशतिधेनवः गात्रावयवसंपन्नगर्भवधे सार्द्धपंचविंशतिधेनवः
९ सर्वगात्रसंपन्नचैतन्यहीनगर्भवधे पादोनत्रिंशद्धेनवः चैतन्ययुक्तगर्भवधे चतुस्त्रिंशद्धेनवः क्रमेणैवं क्षत्रियस्वामिकवधे
पञ्चदशाष्टादशैकविंशतिचतुर्विंशतिधेनवः क्रमेणैवं वैश्यस्वामिकवधे दशद्वादशचतुर्दशषोडशधेनवः एवं शूद्रस्वा
मिकवधे पंचषट्सप्ताष्टौ धेनवः कैवर्ताद्यधमशूद्रस्वामिकवधे सार्द्धधेनुद्वयं तिस्रो धेनवः सार्द्धतिस्रो धेनवः चतस्रो धेनवः
इदं ज्ञानतः अज्ञानतः सर्वत्रार्द्धमिति अत्यंतश्लिष्टा॰ ज्ञातोन्मत्ता॰ त्यंतव्याधिपीडिताधवालातमोरूढानां हनने पादप्रायश्चि
त्तमिति भवदेवः यथा ब्राह्मणस्वामिकगोवधे सपादचतस्रो धेनवः क्षत्रियस्वामिकवधे तिस्रो धेनवः वैश्यस्वामिकवधे।
द्वे धेनू शूद्रस्वामिकवधे धेनुरेका अधमशूद्रस्वामिकवधे ऽर्द्धधेनुरिति इदं तु ज्ञानतः अज्ञानतोऽर्द्धमिति ब्राह्मणस्वामिकग
र्भिणीताडनेन यदि गौर्जीवति गर्भमात्रपातो भवति तदा ज्ञानत उत्पन्नमात्रगर्भपातने सपादचतस्रो धेनवः अवयवनिष्पन्न
गर्भपातने सार्द्धाष्टौ धेनवः सर्वगात्रनिष्पन्नचैतन्यरहितगर्भपाते पादोनत्रयोदशधेनवः चैतन्ययुक्तगर्भपाते सप्तदशधेन राम
वः क्षत्रियस्वामिकवधे तिस्रः षट् नव द्वादश धेनवः वैश्यस्वामिके तु द्वे चतस्रः षडष्टौ धेनवः शूद्रस्वामिके तु एकद्वित्रिचतु ९
र्धेनवः अधमशूद्रस्वामिके तु अर्द्धैकसार्द्धधेनवः अज्ञानतः सर्वत्रार्द्धमित्याहुः एवं द्वाभ्यामेकहनने यद्धेयं तत्प्रायश्चित्तं तत्र।

द्वादश धेनवः अज्ञानतः सर्वेषामर्द्धमिति ज्ञानकृतवैश्यस्वामिकैकहायनीवधे द्विधेनवः द्विहायनीवधे चतस्रो धेनवः
त्रिहायनीवधे षट् धेनवः चतुर्हायनीवधेऽष्टौ धेनवः अज्ञानतः सर्वेषामिति ज्ञानतः शूद्रस्वामिकैकहायनीवधे धेनुरे
का द्विहायनीवधे द्विधेनू त्रिहायनीवधे प्राजापत्यः पादः द्विहायनीवधे द्विपादः त्रिहायनीवधे त्रिपादः चतुर्हायनीवधे प्रा
जापत्यम् एतदज्ञानतः ज्ञानतो द्वैगुण्यं बोध्यम् चतुर्हायनीवधे यावद्दशं प्रायश्चित्तं ज्ञानतो ज्ञानतो वा उक्तमिति वृद्धातिकृ।
शातिरोगिणी चेत्तदर्धम् अथ बुद्धिपूर्वकैकप्रयत्नतः जनितवह्न्येकहायन्यादिगोवधप्रायश्चित्तं तत्र ब्राह्मणस्वामिकवह्न्ये
कहायनीवधे सार्द्धाष्टौ धेनवः द्विहायनीवधे सप्तदश धेनवः त्रिहायनीवधे सार्द्धपञ्चविंशति धेनवः चतुर्हायनीवधे चतु
स्त्रिंशत् अज्ञानतोऽर्द्धं क्षत्रियस्वामिकविषये क्रमेण षट् द्वादशाष्टादश चतुर्विंशतिनमः वैश्यस्वामिके चतुरष्ट द्वादश षो
डशः शूद्रस्वामिके द्विश्चतुः षडष्टौ अधमशूद्रकैवर्तादिस्वामिके एकद्वित्रिचतस्रः अज्ञानतोऽर्द्धं मूढहनीयमिति तथा बहुक
र्तृकैकहायन्यादिवधे पादः पादः प्रतिपुरुषेण कर्त्तव्यः अज्ञानतोऽर्द्धं मूढहनीयं क्रमकर्त्ततेतु व्यापारभेदात्तत्रानङ्गीकारश्च प्रा।
यश्चित्तावृत्तिरिति गर्भिणीकपिलादोग्ध्री होमधेनुवधे द्वैगुण्यं प्रायश्चित्तस्य यथा ज्ञानतो ब्राह्मणस्वामिकगर्भिण्यादिव
धे चतुस्त्रिंशद्धेनवः क्षत्रियस्वे चतुर्विंशतिर्वैश्यस्वे षोडश शूद्रस्वेष्टौ अधमशूद्रस्वे चतस्रो धेनवः अज्ञानतोऽर्द्धं स्मार्त्तो

यथा संवर्त्तः एका चेद्बहुभिः का
प्रा॰क कृतिभूतयोरित्यर्थः बहुभिरेकस्या गोर्हनने यत्र यद्विहितं व्रतं तत्र तस्यैव पादं प्रत्येकं करणीयं यथा संवर्त्तः एका चेद्बहुभिः का
८ पिदैवाद्व्यापादिता भवेत् पादं पादं च हत्याया अश्चरेयुस्ते पृथक् पृथक् अत्रैका चेदित्युपलक्षणम् द्वयोर्बहूनां च हनने प्रतिपुरु
षपादद्वयादिकं इदं मज्ञानतः कामतश्चेद्बहूनामपि प्रत्येकं कृत्स्नदोषः संपूर्णप्रायश्चित्तं एकं घ्नतो बहूनां च यथोक्तं द्विगुणो
द्वमद्वृति प्रत्येकं द्विगुणदर्शनात् पशुवत्प्रायश्चित्तानि भवंतीति न्यायात्प्रायश्चित्तं करणीयमिति मिताक्षरा स्मार्तास्तु एकाधिकाना।
मेकप्रयत्नेन बहुभिर्वधे व्यापन्नानां बहूनामिति पूर्वोक्तवचनादेकैकपुरुषस्य द्विपादं कृत्वा प्रायश्चित्तं प्रयत्नभेदे तु गोघ्नवदि।
त्यनेन तंत्रता यान्त्रभावात् प्रतिपुरुषं पादद्वयावृत्तिरित्याहुः दैवादिति विशेषणादकामकृते इदं कामकृते द्विगुणमिति वहु।
भिरित्युपादानात् द्वाभ्यां हनने तु संपूर्णप्रायश्चित्तमिति स्मार्ताः अत्यंतपीडितमरणावस्थापन्नोन्मत्तादिगोवधे यथोक्तप्रायश्चि
त्तपादे मनुवचनमाह भवदेवः क्लांतमद्यामन्मुन्मत्तं प्रमत्तं व्याधिपीडितम् अंधं बालं तमोरूढं हत्वा पादं समाचरेदिति अथैकहा राम
यन्यादिक्रमेण संक्षेपतः प्रायश्चित्तधेनुनिर्णयः अत्र ज्ञानकृतब्राह्मणस्वामिकएकहायनीवधे सपादचतस्रो धेनवः द्विहाय ८
नीवधे च सार्धाः षट्धेनवः त्रिहायनीवधे सार्धा दान त्रयोदश धेनवः चतुर्हायनीवधे पंचदश धेनवः अज्ञानतः सर्वेषामर्द्धमि
ति ज्ञानतः क्षत्रियस्वामिकैकहायनीवधे तिस्रो धेनवः द्विहायनीवधे षट् धेनवः त्रिहायनीवधे नव धेनवः चतुर्हायनीवधे

मेणएकद्वित्रिपादसंपूर्णं प्रायश्चित्तमुक्तं स्मार्त्तैः तदनुमोदितमिति अतिवृद्धादिवधेर्द्धं प्रायश्चित्तमाह बृहस्पतिः अतिवृ
द्धामतिकृशामतिबालां च रोगिणीं हत्वा पूर्वविधानेन चरेदर्द्धव्रतं द्विजः पूर्वविधानेन मन्वाद्युक्तत्रैमासिकादिना अतिवृद्धा
तृणच्छेदनासमर्था अतिकृशा दोहनवाहनायोग्या अतिबाला द्विवर्षीया यथा द्विगुः वर्षमात्रा तु बाला स्यादतिबाला द्विवा
र्षिका अतः परं तु सा गौः स्यात्तरुणी दंतजन्मनि अत एव वक्ष्यते द्विपादस्तु द्विहायने एतेन संपूर्णव्रतमुक्तं तत्पुष्टितारुण्यादियुक्तायां
गवि बोद्धव्यम् अथैकहायन्यादिवधे प्रायश्चित्तमाह बृहत्प्रचेताः एकवर्षगविहते कृच्छ्रपादो विधीयते अबुद्धिपूर्वं पुंसः स्याद्विपा
दस्तु द्विहायने त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परम् अतः परं चतुर्थहायनादावित्यर्थः इदमपि प्रायश्चित्तं लाघवेनाबुद्धि
पूर्वकाधमशूद्रस्वामिकगोवधविषयमिति शूलपाणिः तेन यत्स्वामिकगोवधे यत्प्रायश्चित्तं ज्ञानकृतेऽज्ञानकृते वा तस्यैव पादा
दिकमूहनीयमिति स्मार्त्तेन स्पष्टीकृतं एकप्रयत्ननिष्पन्ने बहूनां गवां वधे गुर्वेकपापजनकत्वात् प्रायश्चित्तद्वैगुण्यं न तत्र तंत्र
त्रापापभेदाभावादिति यथा संवर्तः व्यापन्नानां बहूनां च बंधने रोधनेपि वा भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत् बहूनामे
कानामिति स्मार्त्तः अपिशब्दाद्दृढदाहादिपरिग्रहः क्रमकृते तु प्रयत्नभेदात्प्रायश्चित्तावृत्तिः स्यादेव यथोपपातकानुवृत्तौ यमः
गोघ्नवद्विहितः कत्यश्चान्द्रायणमथापि वा अभ्यासे तु तयोर्भूयस्ततः शुद्धिमवाप्नुयात् तयोर्गोवधतदन्योपपातकयोः प्रकृति

प्रा॰क॰ त्वेन क्रियेरन् तेन गौर्विकल्पकत्वेन हिरण्यादिकमुक्तं न तु गोमूल्येनेत्याहुः यत्र दाने त्विदं लेख्यं पूर्वदिने सशिखवपनं कृत्वाघ
७ तंमाश्य उपोष्य परदिने स्नानादिकं विधाय ॐ अद्येत्यादि ब्राह्मणस्वामिकगोज्ञानकृतसाक्षाद्वधजनितपापक्षयकामस्त्रैमा
सिककृच्छ्रतानुकल्पसप्तदशप्राजापत्यानुकल्पसप्तदशधेनुमूल्यलभ्यकांचनमग्निदैवतं ब्राह्मणायाहं ददे इत्यनेनोत्सृज्य दद्या
त्ततः संप्रदानाय वृषभैकादशमास तन्मूल्यं वा दत्वा च्छिद्रावधारणं कुर्यात् प्रायश्चित्तानन्तरं पार्वणविधिना श्राद्धं कर्तव्यं भैक्ष्य।
दानं वा कर्तव्यम् अमुकस्य ममनेन दितियत्स्वामिके गोवधे यत्प्रायश्चित्तं तत्स्वामिकगर्भिण्यादिवधे द्विगुणं प्रायश्चित्तमाह वृ
हस्पतिः गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां दण्डादिना घातयित्वा द्विगुणं गोव्रतं चरेत् दोग्ध्री बहुक्षीरां गर्भिणीमात्रव
धे प्रायश्चित्तद्वैगुण्यमिति शूलपाणिभ[illegible]संमतं तस्मात्तोसु सचेतनगर्भयुक्तायावधे संपूर्णप्रायश्चित्तं द्वैगुण्यं अन्यत्र तु
त्पन्नादिभेदेन पादपादद्वयपादत्रययुक्तं[illegible]पूर्णप्रायश्चित्तं यथाह मनुः गवां निपातने चैव गर्भनाशो भवेद्यदा एकैकं तु
चरेत्कृच्छ्रं यथापूर्वं यथापरम् कृच्छ्रपादं[illegible]पूर्णव्रतपदं तदेव पुनर्विशदयति पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसंमिते पादो राम
नं कृच्छ्रमाचष्टे हत्वा गर्भमचेतनम् अंगप्रत्यङ्गसंपूर्णे गर्भे चेतःसमन्विते द्विगुणं गोव्रतं कुर्यात्प्रायश्चित्तं विशुद्धये दत्या २
हुः भवदेवस्तु हत्वा गर्भमचेतनमित्यत्र पठित्वा यदि तिलगुडादिदानेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भादिक्रं

निचतस्रो धेनवः तन्मूल्यानि द्वादशकार्षापणा वात्र यः कल्पाः एतज्ज्ञानकृते अज्ञानकृते प्राजापत्यद्वयं अत्र सामान्यतः स्त्र्यादीना
मर्द्धप्राप्तौ पदीव धे पुनरुपादानं न ब्राह्मणक्षत्रियविशां तुल्यं प्रायश्चित्तं शूद्रबालकस्त्रीवृद्धानामर्द्धज्ञापनार्थमिति शूलपाणिः ए
कस्योभयादिधर्मवत्वे पाद इति भवदेवेन तु विप्रे तु सकलं देयापादोनं क्षत्रिये मतं वैश्येर्द्धं पादशेषं तु शूद्रजातिषु कल्प्यत इति बृ
हस्पतिविष्णुवचनाद्गोवधे पादहानिरुक्ता गोघ्न इति यस्य व्यापारानंतरं कारणांतरमनपेक्ष्य कालांतरे वा गवां प्राणवियोगे प्रभ
वति सोपि साक्षाद्गोघ्नः ज्ञानकृतत्वं गां हन्मीति कामनया हननमज्ञानकृते च तत्तदर्द्धमिति प्रायश्चित्तानंतरं पार्वणविधिना श्रा
द्धं कर्त्तव्यमक्रियते श्राद्धमेतत्तु ब्राह्मणानां च भोजनम् शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिरिति भविष्यपुराणात् व्रतं गोस्वा
मिने मूल्यं प्रतिरूपं वा दत्वा करणीयम् आदौ गोपतये दद्याद्गोमूल्यं साधुकल्पितम् यथोक्तेनैव तस्मात्तु चर्मणाच्छन्नविग्रह इति
ब्रह्मपुराणात् प्रमापणे प्राणभृतां प्रतिरूपं प्रदापयेत् तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुरिति पाराशरीयात् उत्सर्गस्तु ॐ।
अर्घ्येत्यादि ब्राह्मणस्वामिकगोज्ञानकृतमाक्षाद्वधजनितपापक्षयकामो मनूक्तत्रैमासिकव्रतानुकल्पसप्तदशप्राजापत्यानु
कल्पसप्तदशधेनुमूल्यलभ्यकांचनमग्निदैवतं यथानामगोत्राय ब्राह्मणायाहं ददे मूल्यकांचनप्रदप्रयोग इति शूलपाणिः॥
स्मार्त्तास्तु पत्रयद्रव्यं तत्र तन्नामांल्लिख्य देयम् हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि एतान्येवानां देशेक्रि

सेतुसविप्रान्भोजयेन्द्विजः भुक्तवत्सुतुविप्रेषुगांप्रदद्याद्विचक्षणं गवामभावेदातव्यंतन्मूल्यंतुनसंशयः अथक्षत्रियस्वामिकायां गो
प्रा॰क॰ ६ ज्ञानेकृतसाक्षाद्वधेतुदेवलः षण्मासान्तच्चर्मणापरिवृतो गोग्रासाहारो गोव्रतोपवासी गोभिरेवसंचरन् प्रमुच्यते गोग्रासाहारो गो
ग्रासहर्त्तातेनात्रषाण्मासिकंव्रतंद्वादशप्राजापत्यानिद्वादशधेनवस्तन्मूल्यानिषट्त्रिंशत्कार्षापणावाचत्वारः कल्याः दक्षिणाय
र्थाधिक्रियेति शूलपाणिः। भवदेवेनतुवृषहन्ता वृषभंस्त्रीगवीहन्तागर्भपतनशीलाङ्गांदक्षिणान्दद्यात् वृषभावेहन्तोदद्यात्तामिति
कर्त्तव्यनिर्देशादित्युक्तमिति वस्तुतस्तुयद्यप्यत्रदक्षिणानश्रूयतेतथापिब्राह्मणस्वामिकव्रतात्यंचधेनुहीनत्वाद्वृषभशून्यादश
भवः प्रतीयन्तेअन्यथाज्ञानकृतवैश्यसंबंधिगोवधेगोर्दक्षिणायाज्ञवल्क्येनोक्ता अत्रनकिंचिदितिविषमशिष्टत्वापत्तेः एतन्त्वा
नकृतेअज्ञानकृतेतदर्द्धं वैश्यसंबंधिगोवधेतुयाज्ञवल्क्यः पंचगव्यंपिबेद्गोघ्नोमासमासीतसंयतः गोष्ठेवसेद्गोनुगामीगोप्रदानेन
शुद्ध्यतीति गोमतींचजपेन्नित्यमितिशातातपेनाधिकमुक्तम् अत्रमासव्रतंचत्वारिप्राजापत्यानिचतस्रोधेनवस्तन्मूल्यानि द्वाद
शकार्षापणावाचत्वारः कल्याः दक्षिणाधेनुरूपागौरितिशूलपाणिः एतदज्ञानकृतेज्ञानकृतेनतुतद्द्वैगुण्यमितिपंचगव्यंयथागोश राम ६
कृतद्विगुणंमूत्रंघृतंदद्याच्चतुर्गुणं क्षीरमष्टगुणंप्रोक्तंपञ्चगव्येतथादधिनयाष्टगुणम् शूद्रस्वामिकगोवधेविश्वामित्रः कृच्छ्रांस्तु
चतुरः कुर्याद्गोवधेवुद्धिपूर्वके अमत्यातुद्वयंकुर्यात्तदर्द्धंबालवृद्धयोः स्त्रीशूद्रयोरेवमेतद्वधेचैवनसंशयः अत्रचत्वारिप्राजापत्या

प्रकीर्त्तितः एतत्त्र्यहसाध्यसार्द्धोपवासतुल्यत्वेनात्रद्वादशपणाइति अथब्राह्मणस्वामिकचतुर्हायन्यादिकज्ञानकृतमासाज्ञो
वधेव्रतमाहमनुः उपपातकसंयुक्तोगोघ्नोमासंयवान्पिबेत् कृतवापोवसेद्गोष्ठेचर्मणातेनसंवृतः चतुर्थकालमश्नीयादक्षारलवणंम
तं गोमूत्रेणाचरेत्स्नानंद्वौमासौनियतेन्द्रियः दिवानुगच्छेत्तागास्तुतिष्ठन्नूर्द्ध्वंरजःपिबेत् शुश्रूषित्वानमस्कृत्यरात्रौवीरासनंवसेत् ति
ष्ठंतीष्वनुतिष्ठेत्तुव्रजंतीष्वप्यनुव्रजेत् आसीनासुतथासीनोनियतोवीतमत्सरः आतुरामभिशस्तांवाचौरव्याघ्रादिभिर्भयैः पतितांपंक
लग्नांवासर्वप्राणैर्विमोचयेत् उष्णेवर्षतिशीतेवामारुतेवातिवाभृशम् नकुर्वीतात्मनस्त्राणंगोरकृत्वातुशक्तितः आत्मनोयदिवान्येषांगृहे
क्षेत्रेखलेपिवाभक्षयंतींनकथयेत्पिबंतंचैववत्सकम् अनेनविधिनायस्तुगोघ्नोगामनुगच्छति सगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपो
हति वृषभैकादशागास्तुदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंब्राह्मणेभ्योनिवेदयेत् अत्रगोमूत्रेणयवागूकृतमितिगौतमसूत्रात्
गोमूत्रेणमासंयावकपानेनप्राजापत्यंद्वयंमासद्वयम् चतुर्थकालभोजनेनत्रिंशतोपवासैः कृच्छ्रदशकंत्रिंशतानक्ताशनैः कृच्छ्र
पंचकंसंकल्प्यमिलित्वासप्तदशप्राजापत्यानिभवंति इत्युक्तंशूलपाण्यादिभिः भवदेवभट्टस्तुद्वादशप्राजापत्यान्याह तेनात्रत्रैमासिक
व्रतंसप्तदशप्राजापत्यानिसप्तदशधेनवः तन्मूल्यान्येकपंचाशत्कार्षापणावाचत्वारः कल्प्याः दक्षिणाचवृषभैकादशगावस्तन्मू
ल्यानिपंचदशकार्षापणावादेयाइति अज्ञानात्कृतेतदर्द्धंसार्द्धमासिकव्रतादिकंगोरेकादक्षिणादेयाइति यथासंवर्तः पूर्णेतुमासि

कदेवशर्मोपक्षेवधजन्यपापक्षयकामोनक्तव्रतमहंकरिष्ये रूप्यमाषकदानेतु इदंरूप्यमाषकंचंद्रदैवतंयथानामगोत्रा

प्रा॰क॰ ५ यब्राह्मणायाहंददे मूल्यदानेतु इदंरूप्यमाषकमूल्यंविष्णुदैवतमित्यादिदानेतु द्रव्यंब्राह्मणंचादौसंपूज्यद्रव्यमालभ्यसंप्रो।

क्ष्यदानं अर्चितमर्चितायदद्यात् यथोक्तंदक्षिणांयथाशक्तिदक्षिणांवादद्यादितिहारीतसूत्रदर्शनात् प्राजापत्यव्रतमाहम

नुः त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितंत्र्यहंपरंत्वानाश्नीयात्प्राजापत्यंसमाचरन् सायंद्वाविंशतिर्ग्रासाः प्रातः षड्विंशा।

तिस्तथा अयाचितेचतुर्विंशाः परंत्वानशनंस्मृतं कुक्कुटाण्डप्रमाणंतुयावद्वाप्रविशेन्मुखम् एतद्ग्रासंविजानीयाच्छुद्ध्यर्थं।

कायशोधनम् प्राजापत्यव्रतंषडुपवाससमंपयस्विनीधेनुदानसमानंचवाचिकम् तथामत्यादीनभिधायमनुः भुक्त्वावा

न्यतमस्यान्नममत्याक्षपणंत्र्यहं मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेत्यत्रषडुपवासेवक्तव्येप्राजापत्यविधानादिति धे।

नुदानंचसमानेचषडुपवासेकार्षापणत्रयसंकल्पनादिति पादोनंकृच्छ्रमाहशंखः द्व्यहंप्रातर्द्व्यहंसायंद्व्यहमद्यादयाचितं

त्र्यहंपरंत्वोपवासंपादोनव्रतमाचरन् अत्रसार्द्धोपवासचतुष्टयसंकल्पनेनचतुःपणाधिककार्षापणद्वयंकृच्छ्रार्द्धव्रतमा राम

हापस्तंबः सायंप्रातस्तथैवैकंदिनद्वयमयाचितं दिनद्वयंचनाश्नीयात्कृच्छ्रार्द्धमभिधीयते एतद्दिनेषट्कसाध्यमुपवासत्रय। ५

संकल्पनेनसार्द्धकार्षापणतुल्यमितिपादकृच्छ्रमाहयाज्ञवल्क्यः एकभुक्तेननक्तेनतथैवायाचितेनचोपवासेनचैकेनपादकृच्छ्रः

गाव्रतमाह हारीतः केशानांधारणार्थंतुद्विगुणंव्रतमाचरेत् द्विगुणेचव्रतेचीर्णेद्विगुणादक्षिणाभवेत् वपनंचद्वादशाः
र्धव्रतेकार्य्यम् द्वादशाहेसंपूर्णवपनमितिपैठीनसिः न्यूनेत्वाहसंवर्तः नखानांछेदनंपादेद्विपादेश्मश्रुणः स्मृतं त्रिपादेतुशि
खावर्ज्जंमशिखंचततः परम् वपनादिकंधेनुदानादावपितुल्यन्यायादितिज्ञेयम् सशिखवपनेतुसदाबद्धशिखेनचेत्यस्य
गायत्र्यातुशिखांबध्वानैर्ऋत्यांब्रह्मरंध्रतः जुटिकांचततोबध्वाततःकर्मसमाचरेत् इतिब्रह्मपुराणस्यचवाध्योनदोषाय
नैमित्तिकेननित्यबाधस्यफलचमसादौसंगृहीतत्वादिति अष्टमीचतुर्दशीभिन्नकालेप्रायश्चित्तमाहव्यवहारचिंतामणौव्या
सः नाष्टम्यांनचतुर्दश्यांप्रायश्चित्तपरीक्षणम् इतिचतुर्दश्यांसंकल्प्यामावास्यायांकार्य्यमितिशिष्टाचारः अथव्रतनिर्णयः
दिवाछिन्नंव्यरात्रेः सार्द्धप्रहराभ्यंतरेपरिमितभोजनरूपंनक्तव्रतंतद्दशक्तौरूप्यमाषकंदातव्यंपक्षिवधेनक्तंरूप्यमाषकंवा
दद्यादितिहारीतस्तत्रानु रूपमाषकंचरक्तिकाद्वयमाह मनुः द्वेकृष्णलेसमधृतेविज्ञेयोरूप्यमाषकः तदभावेतन्मूल्यंदा
तव्यंधेनोरभावेदातव्यंतुल्यंमूल्यंनसंशयः इत्येकत्रदृष्टत्वादन्यत्रापितथाऽऽकल्प्यते उपवासव्रतंनक्तत्रयेणसमंदिवाभोज
नरहितस्यरात्रिक्षपणेक्लेशत्रैगुण्यात्तदशक्तौरूप्यमाषकत्रयंतन्मूल्यंवाअष्टौपणादेयाः अत्युत्कृष्टरजतत्रिमाषकस्यपा
पाष्टकलभ्यत्वादेवंद्वितीयोपवासादौतथावोध्यंविशेषाश्रवणादितिशूलपाणिः वाक्यंतु ॐ अद्येत्यादिअमुकगो॰

प्रा॰ क॰ णिकागावोवृषभः षट्पुराणक इतिवचनात् प्रसिद्धवचनानुसारेणव्यवस्थाश्रेयसीति प्रतीमः अथ प्रायश्चित्तपूर्व[illegible]ह्न कृत्यं श
४ खलिखितौवाप्यकेशनखान्पूर्वे घृतं प्राश्य बहिर्निशि प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् वहिर्नगृहे प्रत्येकं नियतं काल
[illegible]ने व्रतकालसंख्याः संकल्पवाक्ये उल्लेखनीया इत्यर्थः निशि निशामुखे व्रतं निशामुखे ग्रासं च बहिस्तारकदर्शनादिति लघुहा
री[illegible]कवाक्यत्वात् तेन प्रायश्चित्तपूर्वदिने केशादीनिवापयित्वा घृतं प्राश्य प्रदोषे संकल्पः कार्य्यः मुण्डनं च महापातकगोवधाद्य
तिरिक्ते विहद्विप्रनृपस्त्रीणां नास्ति विहद्विप्रनृप[illegible]णां नेष्यते केशवापनम् ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः इति मि
ताक्षरीयात् स्त्रीणां मुण्डने विशेषमाह पराशरः वपनं नैव नारीणां नानुव्रज्या जपादिकम् न गोष्ठे शयनं कार्यं न च दध्युर्गवाजि
नं सर्वान्केशान्समुद्धृत्य छेदयेदंगुलिद्वयं. सर्वत्रैव हि नारीणां शिरसो मुण्डनं स्मृतम् सर्वत्र प्रागुक्तमहापातकादिपरम् अत्र
नारीपदं विधवापरम् सधवाया अंगुलिद्वयच्छेदनोक्तेः मुण्डननिषेधमाह पारिजातधृतवचनम् सधवानां तु नारीणामलंका
राद्गर्भविदा केशसंवरणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः अत्र विधवाया वपनं सधवाया अंगुलद्वयच्छेदनं यत्केनचिदुक्तम् तत्पराशरी राम
यद्वितीयवचनशेषाद्धीनवलोकनेनेति हेयं अबुध्वाहेयमित्युक्तम् यासां केशधारणे विधानं तासामेवांगुलिद्वयच्छेदनं उभयोर्मु ५
ण्डनापवादत्वात् पूर्ववचनीयनारीपदं सधवापरमिति बोध्यं विधवायाः केशधारणे विधानाभावात् केशधारणच्छायां [illegible]

शूद्रस्यमृगपानस्थानेब्राह्मणीगमनंतस्यमृगप नत्वानित्याभावात् ...ब्राह्मण स्वामिकाशीतिरत्निकामिनहेमः गुर्वङ्ग
वैवर्णोत्तमवर्णायाविमाता नवधासंसर्गमाहवृहस्पतिः एकशय्यासनं पंक्तिर्भाण्डं पक्वान्नमिश्रणम् याजनाध्ययने योनि...
...हभोजनंनवधासंकरप्रोक्तोनकर्तव्योधमैः सह नारदः याजनंयोनिसंबंधः स्वाध्यायंसहभोजनम् कृत्वासद्यःपतंत्येतेनेप
तितेनसंशयः याजनंश्रौतयाजनंसहभोजनमेकपात्रेभोजनंतथा आलापाद्गात्रसंस्पर्शात्स्वाध्यायात्सहभोजनात् सहशय्याम
नात्यानात्यापंसंक्रमतेनृणाम् सहभोजनमेकपंक्तिभोजनपानस्थं आलापादस्तुसंवत्सरेणपातकित्वसंपादकत्वंसंवत्सरेणपत
तिपतितेनसहाचरन्नितिविष्णुवचनात् लघुसंसर्गश्च अतिपातकमाहविष्णुः मातृगमनंदुहितृगमनंस्नुषागमनमित्यतिपातका
निस्नुषापुत्रवधूः अथधेनुमूल्यनिर्णयः तत्रसंवर्तः प्राजापत्यव्रताशक्तौधेनुंदद्यात्पयस्विनींधेनोरभावेदातव्यंतुल्यंमूल्यंनसं
शयः अत्रोत्तममध्यमाधमभेदेनमूल्यमाह षड्विंशमते धेनुःपंचभिरुत्तमानांमध्यानांत्रिपुराणिका कार्षापणैकमूल्याहि दरिद्रा
णांप्रकीर्तिता कार्षापणाः षोडशपणाः कात्यायनः द्वात्रिंशत्पणिकागावोवत्सः पौराणिकोमतः धेनुमूल्यकार्षापणत्रयंसवत्सा
गोर्धेनुरित्यर्थः गोमूल्यंकार्षापणकालाविसंघिकारेस्मृतिः गोः षोडशपणान्त्रैमानवाः संतिनिर्धनाः हिरण्येनोवृषभमूल्यंपंच
कार्षापणाइतिशूलपाणिलिखितं नकिंतुधेनुसंकलनेपठंतीतिकृत्वालिखितवचनंतच्चषट्कार्षापणाइतियथा...शत्य

ग्रा·का [illegible]स्थापितं फलमूलादि अधर्ममत्याग चर्येवैकल्यं विष्णुः यदिनुक्तं तत्प्रकीर्णम् अथोपपातकमाह मनुः गोवधो[illegible]याज्यपा
३ रदार्यात्मविक्रयाः पितृमातृगुरुत्यागः स्वाध्यायाग्न्योः सुतस्य च। परिवित्तितानुजेनैव परिवेदनमेव च तयोर्दानं च कन्या[illegible]यो
रेव च याजनम् कन्याया दूषणं चैव वार्धुष्यं व्रतच्युतिः तडागारामदाराणामपत्यस्य च विक्रयः व्रात्यता बांधवत्यागो भृत्याध्या
पनं तथा भृताच्चाध्ययनादानमपुण्यानां च विक्रयः सर्वाकरेष्वधीकारो महायंत्रप्रवर्तनम् हिंसौषधीनां स्त्र्याजीवोऽभिचारो
मूल[illegible]मेव च इंधनार्थमशुष्काणां वृक्षाणामवपातनम् आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा अनाहिताग्नितास्तेयमृणानां च
[illegible]पक्रिया असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम् स्त्रीशूद्रविट्क्षत्रवधो नास्ति
क्यं चोपपातकम् परिवेदनमेव चेति चकारात्कन्या[illegible] अपि मूलकर्म वशीकरणोच्चाटनकरणम्। क्रियारंभ आत्मार्थं पाकारंभः
नास्तिक्यं नास्ति परलोक इत्यध्यवसानम् अ[illegible]कमाह विष्णुः पितृपितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं पितृष्व
सृमातृष्वसृगमनं च श्रोत्रियर्त्विगुपाध्याय[illegible]पत्न्यभिगमनं स्वसृसख्याः समानगोत्रायाः उत्तमवर्णाया अंत्यजायाः कुमार्याः रज राम ३
स्वलायाः [illegible]शरणागतायाः प्रव्रजितायाः अभिगमनं निक्षिप्तायाश्च पितृपत्नी विमातागंतारमपश्यद्धीनवर्णा अंत्यजात्रैव[illegible]डोलीकु
मारी[illegible]कन्या महापातकमाह मनुः ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः [illegible]संक्रांतिपातकान्याहुः संसर्गश्चापि तैः सह

तेयद्विषमज्ञानकृते तदर्धं प्रायश्चित्तं स्यादकामतः एतद्द्विगुणं बुद्धिपूर्वके इत्याङ्गिरावचनात् कृच्छ्रांस्तु चतुरः कुर्
वधेऽबुद्धिपूर्वके श्रमत्वानुदयं कार्यं तदर्धं बालवृद्धयोरिति विश्वामित्रवचनात् एकत्रैव निर्णीतः शास्त्रार्थो बाधकं विना परत्र।
पीतिः [illegible] च त्रिविधपापोत्पत्तिकारणं यथा मनुः अकुर्वन्विहितं कर्म निन्दितं च समाचरन् प्रसज्यंश्चेन्द्रियार्थेषु प्रायश्चित्ती
यते नरः नन्विन्द्रियार्थप्रसंगस्य कथं पृथगुपादानं इन्द्रियार्थेषु सर्वेषु न प्रसज्जेत कामतः इति मनुना तस्य निषिद्धत्वादिति चेत्स
त्यम् इन्द्रियार्थप्रसंगेनात्र दंशाभिशापावुपलक्ष्येते ताभ्यां दृश्यमानाभिशप्यमानयोः पापमुत्पद्यते यथा मनुः श्वशृगालखर
रैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च नराश्वोष्ट्रवराहैश्च प्राणायामेन शुद्ध्यतीति पैठीनसिः अनृतमभिशप्यमानः कृच्छ्रं मासं कृच्छ्रं समाचरेत्या
नकं [illegible] महापातकेषु द्विमासमिति त्रिविधान्येतानि। जातिभ्रंशकरं संकरीकरणं अपात्रीकरणं मलावहं प्रकीर्णोपपातकानुभ
पातकं महापातकातिपातकानि जनयन्ति नव विधानि। यथा मनुः ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जैह्म्यं पुंसि च
मैथुनं जातिभ्रंशकराणि च। रुजः कृत्वा पीडाकरणम् अघ्रेयं लशुनादि जैह्म्यं मित्रे कौटिल्यम्। खरोष्ट्राश्वमृगेभानाम् जाविक
धस्तथा संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भा
षणम् कृमिकीटवयोहत्या मद्यानुगतभोजनम् फलैधःकुसुमस्तेयमधैर्यं च मलावहम् ध्यानगतं मद्यपानं म[...] दुष

प्रा॰क॰ अनुग्रहः कार्यस्तथा वै शिशुवृद्धयोः अतोन्यथा भवेद्दोषस्तस्मान्नानुग्रहो भवेदिति पाराशरीयाच्च अनुग्रहादे[...]शादनूनं
२ प्रायश्चित्तं न कर्तव्यम् तस्मात्कृच्छ्रमथाप्येवं पापं वापि विधानतः ज्ञात्वा बलाबलं कालं प्रोक्तं प्रायश्चित्तं प्रकल्पयेदिति हारीतोक्तेः कृ
च्छ्रप[...]जहत्स्वार्थलक्षणया पादोनकृच्छ्रमपि ज्ञेयम् यदूर्णं यत्प्रायश्चित्तं तदूर्णं बालवृद्धस्त्रीरोगिणामर्द्धं स्यात्प्रायश्चि
त्तम् अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव चेति विष्णुपुराणात् अत एकस्योभय
[...]धर्मत्रयवत्वेपि वा पादप्रायश्चित्तम् अनुग्रहे पादं वेति वाशब्दस्यैवकारार्थत्वादिति मिताक्षरातः अर्द्धमेव भवेत्पुंसा
कुर्यात्तत्र योषितामिति अत्रोनषोडशवार्षिक[...]गात्तदूर्द्धं संपूर्णप्रायश्चित्तं ऊनैकादशवर्षीयस्य बालस्य पंचवर्षात्परं पा
दप्रायश्चित्तं पादो बालेषु दातव्यः सर्वपापेषु पति[...]गिति विष्णुवचनात् ऊनैकादशवर्षस्य पंचवर्षाधिकस्य च चरेद्गुरुः सुहृ
द्वापि प्रायश्चित्तं विशुद्धये ततेन स्वयमशक्तौ प्रति[...]धिद्वारापि प्रायश्चित्तं करणीयम् पंचवर्षमध्ये तु प्रायश्चित्तं न करणीयम राम
नस्य[...]नस्यासनापराधीनपातकम् न चास्य राजदंडोस्ति प्रायश्चित्तं न विद्यते इत्यंगिरोवचनात् यत्तु चतुर्थाद्वत्सरा[...]दूर्ध्वम् ए २
मंत्र[...]वहि शिशोर्व्रतं प्रकुर्वन्ति गुरुसंबंधिबांधवा[...]ति ब्रह्मपुराणे पंचवर्षे कृतनिधानं तत्तापनाशकातिरिक्तपरमतो
न विशेषः ज्ञानाज्ञानकृते पापे यत्र यदेवोक्तम् तत्र तदेव करणीयम् यत्राज्ञानकृते यदुद्दिष्टं ज्ञानकृते न तत्र तद्द्विगुणम् ज्ञानकृतः

मध्येप्रायश्चित्ताकरणेद्विगुणंप्रायश्चित्तंसंवत्सरगमितेऽब्दमेदुष्टस्यद्विगुणादयइतिमनुवचनात् कालातिरेकेद्विगुणंप्रा[illegible]
मासोर्ध्वे द्विगुणंराजदंडंचदत्वाशुद्धिमवाप्नुयात् इतिदेवलीयाच्च अत्रसंवत्सरमध्येकालातिक्रमप्रायश्चित्तकरणे भोगाद्यक्र
मेणोपरिवत्सरगणनक्रमेणप्रायश्चित्तमितिवदंति प्राप्तानांजिज्ञासूनांप्रायश्चित्ताकथने।चिंतस्यविपश्चितोदोषः आनीनां
याचमानानांप्रायश्चित्तानियेद्विजाः जानंतोनप्रयच्छंतितेपितद्दोषभागिनइत्यंगिरोवचनात् क्षत्रियादौप्रायश्चित्तकथनेब्राह्म
णमंतरितंकृत्वाकथनीयमन्यायतोमार्गमाणानां क्षत्रियादेःप्रणामिनः अंतराब्राह्मणंकृत्वाव्रतमेतत्समादिशेत् इत्यंगिरोव
चनात् गुरुपापेचलघुप्रायश्चित्तंलघुपापेगुरुप्रायश्चित्तंनवक्तव्यम् पापेगुरूणिगुरूणिस्वल्पान्यल्पेचतद्विदः प्रायश्चित्ता।
नि[illegible]यजगुःस्वायंभुवादयइतिविष्णुवचनात् अन्यथाहिमहापापानांलघूनामुपदेशात् गुरूणामुपदेशोहिनिःप्रयोजनत्वं
प्रसंगे। इतिभविष्यपुराणाच्च प्रायश्चित्तप्रदानेयथोक्तंवाच्यंनपुत्रस्नेहादिनानुग्रहः कार्यः तद्यथा लोभाद्वायदिवास्नेहाद्भ
हादज्ञानतोपिवा कुर्वंत्यनुग्रहंयेनुतत्पापंतेषुगच्छतीतिपाराशरीयात् शास्त्रीयप्रायश्चित्तमुदाहृत्यदुर्बलत्वादिनाकेनाग्रहः
कार्यःकृत्वापूर्वमुदोहारंयथोक्तंशास्त्रवेदिभिःपश्चात्कार्यानुसारेणशान्त्याकुर्वन्त्यनुग्रहमित्यंगिरोवचनात्कार्यानुसारेणदुर्बल[illegible]दुर्बले

प्रा॰ कौ॰
१

॥श्रीगणेशायनमः नत्वाकृष्णपदद्वन्द्वंनिर्णयोमुनिसंमतः प्रायश्चित्तकदंबानांगोपालेनवितन्यते १ अथ[illegible]श्चित्तं
यः तत्रहारीतः प्रयतत्वाद्वोपचित्तमशुभंनाशयतीतिप्रायश्चित्तं तत्रवा[illegible]एवकारार्थे वाम्याद्विकल्पोऽपमकारार्थ
त्वसमुच्चयइतिविश्वदर्शनात् प्रयतत्वाद्यय।विधिअनुष्ठानात् उपचितम् संचितमशुभमेवनाशयति ननुपरलोकहि
[illegible]यतियत्कर्मतत्प्रायश्चित्तम् अशुभंपापंपापिनांतदुपदेशेन फलमाहांगिराः यत्पुण्यमुद्दृतेविप्रैस्त्रिप्रमाणैः
[illegible]षु तत्पुण्यंतारितेपापात्प्रायश्चित्तैस्तुमानवे धर्मशास्त्रमविज्ञायप्रायश्चित्तंनवक्तव्यम् अबुद्धाधर्मशास्त्राणिप्रा
यश्चित्तंवदंतिये प्रायश्चित्तीभवेत्पूतस्तत्पापं[illegible]च्छतीतिशातातपीयात् तदर्चादिपूर्वकंकथितव्यम् अनर्चितरनाहू
[illegible]रपृष्टैश्चैवसंसदि प्रायश्चित्तंनवक्तव्यं जा[illegible]द्भिरपिजल्पते इत्यंगिरोवचनात् पापिनासचैलंस्नात्वा उपदेशान्तोषयि
ला[illegible]दसिसप्ष्टाभिधानंवक्तव्यम् सचैलंवाग्यतः स्नात्वाक्लिन्नवासाः समाहितः उपस्थायततः शीघ्रमार्तिमान्धरणींगतः॥
गा[illegible]गिरसाचैवनचकिञ्चिदुदीरयेत् इत्यंगिरोवचनात् तोषयित्वाद्विजोत्तमान् इतिदेवलीयाच्च यत्तुपापं[illegible]ख्यापये राम १
त्वापिदत्वाधेनुंतथावृषम् इतिपाराशरवचनम् तन्महापातकादौविपुलधनविषयम् निश्चितपापस्यभंजेनेसदस्यः
सत्यभाषणेचपापवृद्धिमाहांगिराः कृतेनिःसंशयेपापेनभुंजीतानुपस्थितः भुञ्जानोवर्द्धयेत्पापमसत्यंसदसिब्रुवन्

॥ श्रीकाशीजीमेमंहल्लाबुघुरानासामाकीगलीश्रीयुतबाबूहरखचंदजीकेबाडेमे
दुर्गाप्रसादकटारेकेगणेशयंत्रालयमेंप्रायश्चित्तकदंबछपागयालिखासीतारामभिश्रछापने
वालागोपालजिस्कोलेनाहोयउसेकुंजगलीकेपश्चिमफाटकपरदुर्गाप्रसादकेदुकानपरमिलैगा॥